# भर्तृहरिप्रणीत
# सुभाषितत्रिशती

English Translation
By
G S S Murthy

Ebook edition-1 November 2017

# सुभाषितत्रिशती
Introduction

BhartRhari's three Sataka's (Sataka being a poetic work of one hundred verses) namely, NeetiSataka ,SrungaaraSataka and VairaagyaSataka (dealing with good conduct, romance and renunciation respectively), are well known. The work is available in several editions and in several languages. There are several commentaries in several languages.

Although the work may be known to a large number of people, it is quite possible that many, like me, might not have studied all the three Sataka's in their entirety. Here is an attempt to study the work.

Not much is known about BhartRhari although there are legends associated with his name.   It is said that he was a king and that he was the brother of Vikramaaditya. It is also said that he became an ascetic.

A BhartRhari has written a grammatical treatise, VakyapadIya and I'tsing, the Chinese traveller of 7th century AD mentions of grammarian BhartRhari's death having occurred some years earlier to his writing. If it is assumed that the same BhartRhari wrote the three Satakas, one can say that the poet lived in 7th century AD. It is believed that BhartRhari who wrote VaakyapadIya was a Buddhist, but our poet seems to be a Saivite. Bhoja who lived in 11th century quotes a verse from the Satakas of BhartRhari in his SarasvatIkanThaabharaNa. BhartRhari was therefore earlier to Bhoja. Some scholars identify him to be BhaTTi the author of BhaTTikaavya, who lived before Bhoja. In this presentation, each verse of the text in Devanaagari script followed by prose order in Sanskrit and an English translation of the verse which attempts to be as close to the original as possible is given. I shall follow the text given in "Subhashita-triSati" with Sanskrit commentary of Ramachandra Budhendra published by Nirnayasagar Press (1925).

Any feedback may be sent to murthygss@gmail.com.
G S S Murthy
November, 2017
Bangalore

# नीतिशतकम्

## मङ्गलश्लोकः

**Benedictory verse**

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ नी-० ॥

*अन्वयः: दिक्-काल-आदि-अनवच्छिन्न-अनन्त-चित्-मात्र-मूर्तये स्व-अनुभूति-एक-मानाय शान्ताय तेजसे नमः ।*

Salutation to the beatific Energy whose limitless form of knowledge is uninterrupted along time, directions etc. and whose proof is only through self-perception.

## मूर्खपद्धतिः ( Section on the dull-headed)

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ नी-१ ॥
*अ: बोद्धारः मत्सर-ग्रस्ताः, प्रभवः स्मय-दूषिताः,अन्ये अबोधोपहताः च, सुभाषितम् अङ्गे जीर्णम् ।*

Scholars suffer from jealousy; kings are corrupted by arrogance; others are afflicted with ignorance; (thus) good sayings decay in their own body (without expression).

अज्ञः सुखमाराध्यः सुखतरमाराध्यतॆ विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ नी-२ ॥
*अ: अज्ञः सुखम् आराध्यः, विशेषज्ञः सुखतरम् आराध्यते, ब्रह्मा अपि ज्ञान-लव-दुर्विदग्धम् नरं न रञ्जयति ।*

The ignorant can easily be appeased; a well-versed scholar can be appeased even more easily; even Brahma cannot please a person who has become arrogant after acquiring a bit of knowledge.

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्
समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ नी-३ ॥
*अ: मकर-वक्त्र-दंष्ट्र-अन्तरात् मणिं प्रसह्य उद्धरेत् । प्रचलत्-ऊर्मि-माला-आकुलं समुद्रम् अपि सन्तरेत् । कोपितं भुजङ्गम् अपि शिरसि पुष्पवत् धारयेत् । प्रति-निविष्ट-मूर्ख-जन-चित्तम् न तु आराधयेत् ।*

One could pull out a gem from the jaws of a shark; one could cross the ocean agitated by moving series of waves; one could sport on one’s head an angry serpent as if it is a flower; but one should not try to please the mind of an obdurate fool.

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन् शशविषाणमासादयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ नी-४ ॥
*अ: तैलम् अपि सिकतासु यत्नतः पीडयल् लभेत । पिपासा-आर्दितः मृगतृष्णिकासु सलिलं पिबेत् च । पर्यटन् कदाचित् अपि शश-विषाणम् आसादयेत् । प्रतिनिविष्ट-मूर्ख-जन-चित्तम् तु न आराधयेत् ।*

One could obtain oil by grinding sand with effort; a thirsty person could drink water in mirages; while wandering one could come across a rabbit with horns; but one should never be servile to the whims of an obdurate fool.

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
मूर्खान्यः प्रतिनेतुमिच्छति बलात् सूक्तैः सुधास्यन्दिभिः ॥ नी-५ ॥
*अ: यः मूर्खान् सुधा-स्यन्दिभिः सूक्तैः बलात् प्रतिनेतुम् इच्छति, (सः) असौ व्यालं बाल-मृणाल-तन्तुभिः रोद्धुं समुज्जृम्भते, वज्र-मणिं शिरीष-कुसुम-प्रान्तेन भेत्तुं सन्नह्यति, क्षार-अम्बुधेः माधुर्यं मधु-बिन्दुना रचयितुम् ईहते ।*

One who wants to change stupid persons forcefully through ambrosia-exuding good sayings is attempting to obstruct a serpent through tender threads of lotus stalk, is trying to break a diamond with the ends of a shirisha flower, wishes to sweeten the salty ocean with a drop of honey.

स्वायत्तमेकान्तहितं विधात्रा विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥ नी-६ ॥
*अ: मौनम् अपण्डितानाम् स्वायत्तं एकान्तहितं विधात्रा विनिर्मितं अज्ञतायाः छादनं विशेषतः सर्वविदां समाजे विभूषणम् ।*

Observing silence is an extremely comfortable covering under one's own control created by the creator for those who are not scholars and it is an adornment for them especially in the society of erudite scholars.

यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवमदलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ नी-७ ॥
*अ: यदा अहं किञ्चित्-ज्ञः गजः इव मद-अन्धः समभवम् । तदा सर्वज्ञः अस्मि इति मम मनः अवलिप्तम् अभवत् । यदा बुध-जन-सकाशात् किञ्चित् किञ्चित् अवगतं तदा मूर्खः अस्मि इति मे मदः ज्वरः इव व्यपगतः ।*

When I knew a little I became blind with intoxication like an excited elephant; then my mind was arrogant on the conviction that I knew everything. When I learnt little by little from scholars, then my intoxication was gone like fever on my knowing that I am stupid.

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन् खरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ नी-८ ॥

अ: श्वा कृमि-कुल-चितं लाला-क्लिन्नं विगन्धि जुगुप्सितं निरामिषं खर-अस्थि निरुपम-रस-प्रीत्या खादन् पार्श्वस्थं सुरपतिम् अपि विलोक्य न शङ्कते । क्षुद्रः जन्तुः परिग्रह-फल्गुतां न गणयति हि ।

When a dog is eating with relish as if it is of incomparable taste a donkeys' bone which is malodorous, disgusting, devoid of flesh, covered with worms and wet with its own saliva, it is not worried about even Indra standing by its side. A lowly being does not mind the worthlessness of its possession.

शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अथो गङ्गा सेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ नी-९ ॥

*अ: (या) गङ्गा स्वर्गात् शार्वं शिरः, पशुपतिशिरस्तः क्षितिधरं, उत्तुङ्गात् महीध्रात् अवनिम्, अवनेः च जलधिम् अपि उपगता सा इयं स्तोकं पदम् उपगता । अथवा विवेक-भ्रष्टानां विनिपातः शतमुखः भवति ।*

River Ganga fell down on the head of Shiva from heaven, on to the mountain (Himalaya) from Shiva's head, on to the earth from the lofty mountain and to the ocean from the earth and attained an insignificant state. Perhaps the fall of those who have lost their capacity to discriminate happens in hundreds of ways.

शक्यो वारयितुं जलेन हुतभुक्शूर्पेण सूर्यातपः
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गौर्गर्दभः ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ नी-१० ॥

*अ: हुतभुक् जलेन, सूर्य-आतपः शूर्पेण नागेन्द्रः निशित-अङ्कुशेन , स-मदः गौः गर्दभः (वा) दण्डेन, व्याधिः भेषज-संग्रहेण वारयितुं शक्यः, विषं विविधैः मन्त्रैः प्रयोगैः (च वारयितुं शक्यम्) । सर्वस्य शास्त्र-विहितं औषधम् अस्ति, मूर्खस्य (तु) औषधम् न अस्ति ।*

Fire can be controlled by (using) water, sun's heat by a winnowing basket, a big elephant by a sharp hook, a berserk bull or donkey by a stick, disease by a set of medicines and poison by use of various incantations. For everything there is a medicine prescribed by scriptures, but there is no medicine for a fool.

## विद्वत्पद्धतिः

( Scholarship)

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियस्त्वर्थं विनापीश्वराः

कुत्स्याः स्युः कुपरीक्षकैर्न मणयो यैरर्घतः पातिताः ॥ नी-११ ॥
*अ: यस्य प्रभोः विषये शास्त्र-उपस्कृत-शब्द-सुन्दर-गिरः शिष्य-प्रदेय-आगमाः विख्याताः कवयः निर्धनाः वसन्ति, (तस्य) वसुधाधिपस्य तत् जाड्यम् । सुधियः तु अर्थं विना अपि ईश्वराः । यैः कु-परीक्षकैः अर्घतः पातिताः, (ते कुत्साः स्युः) मणयः न कुत्स्याः स्युः ।*
It is the stupidity of a king if famous poets whose elegant sayings are supported by relevant treatises and whose knowledge of scriptures is meant for their disciples live in penury in his kingdom. Scholars are masters even if they have no money. If gems are under-valued it is the fault of the bad gem-examiners and not of gems.

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-
प्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनम्
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ नी-१२ ॥
अ: (हे) नृपाः, यत् हर्तुः न गोचरं याति, सर्वदा शं पुष्णाति, अर्थिभ्यः प्रतिपाद्यमानम् अपि अनिशं परां वृद्धिं प्राप्नोति, कल्प-अन्तेषु अपि निधनं न प्राप्नोति, येषां विद्या-आख्यम् अन्तर्-धनं (अस्ति) तान् प्रति मानम् उज्झत । तैः सह कः स्पर्धते?
O kings! Do not exhibit haughtiness in front of those (scholars) who have internal wealth called knowledge which cannot be taken away as it cannot be seen, which always bestows wellbeing, which keeps on increasing even when it is transferred to those who seek it and which does not cease to exist even at the end of aeons. Who can compete with them?

अधिगतपरमार्थान् पण्डितान् मावमंस्थाः
तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदरेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम् ॥ नी-१३ ॥
*अ: अधिगत-परम-अर्थान् पण्डितान् मा अवमंस्थाः । लक्ष्मीः तान् लघु तृणम् इव न संरुणद्धि । बिस-तन्तुः अभिनव-मद-रेखा-श्याम-गण्डस्थलानां वारणानां वारणं न भवति ।*
Do not denigrate scholars who have knowledge of the ultimate wisdom; Goddess of wealth, like a blade of grass does not stop them. A filament of lotus stalk does not act as a restraint to an elephant whose temples have become dark due to the fresh flow of rut.[ This is apparently addressed to a king]

अम्भोजिनीवनविहारविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ नी-१४ ॥
अ: विधाता नितरां कुपितः हंसस्य अम्भोजिनी-वन-विहार-विलासम् एव हन्ति । असौ अस्य दुग्ध-जल-भेद-विधौ प्रसिद्धां वैदग्ध्य-कीर्तिम् अपहर्तुम् न तु समर्थः ।

The angry creator may deprive the swan of its playful gait in a lake of lotuses (by drying up the lake). But he is not capable of depriving it of its famed skill in separating milk and water. [ Swans are traditionally thought to have the ability to separate milk from water.]

केर्यूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ नी-१५ ॥
अ: केयूराणि पुरुषं न भूषयन्ति, चन्द्र-उज्ज्वलाः हाराः न, अलङ्कृता मूर्धजाः न, स्नानं न, विलेपनं न, कुसुमं न(भूषयति) । एका वाणी या संस्कृता धार्यते पुरुषं सम्-अल्ङ्करोति; अखिल-भूषणानि क्षीयन्ते; वाक्-भूषणं सततं भूषणम् ।
Bracelets worn on the upper arm do not decorate a person, nor garlands which are as brilliant as moon, nor well groomed hair ; Bath, smearing of perfumes, or wearing of flower does not decorate either; speech delivered in a refined manner decorates a person; all ornaments decay; ornament of speech is the only eternal ornament.

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशस्सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥ नी-१६ ॥
*अ: विद्या नाम नरस्य अधिकं रूपम्, प्रच्छन्नगुप्तं धनम्,विद्या भोगकरी यशः-सुख-करी, विद्या गुरूणां गुरुः, विद्या विदेशगमने बन्धुजनः, विद्या परा देवता,विद्या राजसु पूज्यते, धनं नहि । विद्याविहीनः पशुः।*
Education enhances handsomeness; it is a hidden wealth; it enables enjoyments, fame and happiness; it is a preceptor for preceptors; it acts as well-wisher in a foreign country; it is the highest divinity; education and not wealth is respected by kings. A person without education is an animal.

क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥ नी-१७ ॥
*अ: देहिनां क्षान्तिः चेत् कवचेन किं, क्रोधः अस्ति चेत् अरिभिःकिम्, ज्ञातिः चेत् अनलेन किं यदि सुहृत् दिव्यौषधैः किं फलम् , यदि दुर्जनाः किं सर्पैः यदि अनवद्या विद्या किमु धनैः, यदि व्रीडा चेत् किमु भूषणैः, यदि सुकविता अस्ति राज्येन किम् ?*
If one has patience, where is the need for any armour? If there is a paternal relative where is the need for fire? If there is a friend where is the need for divine medicines? If there are vicious persons where is the need for serpents? If there is faultless

scholarship where is the need for money? If there is humility where is the need for ornaments? If there is good poetry where is the need for a kingdom?

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ नी-१८ ॥
*अ: स्वजने दाक्षिण्यं, परिजने दया, दुर्जने सदा शाठ्यं, साधुजने प्रीतिः, नृपजने नयः, विद्वत्-जने आर्जवं च , शत्रुजने शौर्यं, गुरुजने क्षमा, कान्ताजने धृष्टता; एवं च ये पुरुषाः कलासु कुशलाः तेषु एव लोकस्थितिः ।*
Being considerate towards kith and kin; being compassionate towards attendants; being deceitful towards scoundrels; being affectionate towards good persons; being courteous towards royals; being straight forward towards learned persons; being valorous towards enemies; being indulgent towards elders. This world is dependent upon people who display such skills.

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किन्न करोति पुंसाम् ॥ नी-१९ ॥
*अ: सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मान-उन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति। (सत्सङ्गतिः) पुंसां किम् न करोति, कथय ।*
Company of the virtuous persons removes the lethargy of mind, soaks speech with truth, guides for attaining higher respect, cancels the past sin, freshens mind and spreads fame in all directions. Tell, what is it that it cannot do?

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति तेषां यशःकाये जरामरणजं भयम् ॥ नी-२० ॥
*अ: सुकृतिनः रस-सिद्धाः ते कवीश्वराः जयन्ति । तेषां यशः-काये जरा-मरण-जं भयम् नास्ति ।*
The blessed great poets who have attained the mastery of sentiments flourish. There is no fear of death or old age to their body of fame.

## मानशौर्यपद्धतिः

Section on valour of self respect

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशाम्
आपन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः

किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ नी-२१ ॥
*अ: मान-महताम् अग्रेसरः केसरी क्षुत्-क्षामः अपि, जरा-कृशः अपि, शिथिल-प्रायः अपि, कष्टां दशाम् आपन्नः अपि, विपन्न-दीधितिः अपि, प्राणेषु नश्यत्सु अपि, मत्त-इभ-इन्द्र-विभिन्न-कुम्भ-पिशित-ग्रास-एक-बद्ध-स्पृहः जीर्णं तृणम् अत्ति किम्?*
Does a lion which stands tall among those valuing self respect and which is solely desirous of a mouthful of meat of the temple of an elephant in rut eat withered grass even if it (the lion) is weak due to old age, well nigh tottering, is in difficult circumstance, has lost its lustre with its life ebbing out?

स्वल्पस्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्द्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ नी-२२ ॥
*अ: श्वा स्वल्प-स्नायु-वस-अवसेक-मलिनं निर्मांसम् अस्थि अपि लब्ध्वा परितोषम् एति, तु तत् तस्य क्षुधा-शान्तये न (भवति) । सिंहः अङ्कम् आगतं जम्बुकम् अपि त्यक्त्वा द्विपं निहन्ति । सर्वः जनः क्रुच्छ्र-गतः अपि सत्त्व-अनुरूपं फलं वाञ्छति ।*
A dog feels happy to get a flesh-less bone dirtied by remnants of a bit of ligament and marrow although it does not satisfy its hunger. A lion kills an elephant leaving a fox which has landed on its lap. Persons seek fruits according to their own status even if they are in difficulties.

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति छाटुशतैश्च भुङ्क्ते ॥ नी-२३ ॥
*अ: श्वा लाङ्गूल-चालनं अधः-चरण-अवपातं भूमौ निपत्य वदन-उदर-दर्शनं च पिण्डदस्य (पुरतः) कुरुते| गज-पुङ्गवः तु धीरं विलोकयति, चाटु-शतैः च भुङ्क्ते ।*
A dog wags its tail, shows its face and stomach falling at the feet of the person who feeds it. But an elephant looks majestically and eats after being cajoled by graceful words.

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ नी-२४ ॥
*अ: परिवर्तिनि संसारे मृतः कः वा न जायते? येन जातेन वंशः समुन्नतिं याति, सः जातः ।*
In this cycle of life, who is not born again after dying? The birth of a person who elevates his dynasty is indeed the birth.

कुसुमस्तबकस्येव द्वयी वृत्तिः मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ नी-२५ ॥

*अ:मनस्विनः वृतिः कुसुम-स्तबकस्य इव द्वयी; सर्वलोकस्य मूर्ध्नि (शोभते)वा वने एव शीर्यते ।*
Mode of conduct of the wise is of two kinds like that of a bunch of flowers, either assuming its position at the head of all or languishing in a forest.

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषाः
तान्प्रत्येष विशेषविक्रमरुची राहुर्नवैरायते ।
द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ नी-२६ ॥
*अ: भ्रातः पश्य, बृहस्पति-प्रभृतयः अन्ये अपि संभाविताः पञ्चषाः सन्ति; एषः विक्रम-रुची दानव-पतिः राहुः तान् प्रति न वैरायते; शीर्ष-अवशेष-आकृतिः पर्वणि भास्वरौ दिवाकर-निशा-प्राण-ईश्वरौ द्वौ एव ग्रसते ।*
Look, brother. There are others like Jupiter, five or six in number who are (equally) respected; this chief of demons, Rahu, who is fond of being valorous does not show enmity towards them; with only his head remaining in his form he swallows the bright sun and the bright moon during the full moon and the new moon.

वहति भुवनश्रेणिं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरात्
अहह महतां निःसीमानश्चरित्रविभूतयः ॥ नी-२७ ॥
*अ: शेषः फणा-फलक-स्थितां भुवन-श्रेणिं वहति; सः च कमठ-पतिना मध्ये-पृष्ठं धार्यते च; पयोधिः तम् अपि अनादरात् क्रोड-अधीनं कुरुते; महतां चरित्र-विभूतयः निःसीमानः, अहह ।*
Adisesha carries the whole set of worlds on his broad and flat hood; he is carried by the great tortoise on its back; the ocean nonchalantly carries it in its hollows. The manifestations of the conduct of the great are really boundless. What a wonder! It is not proper for a person to run away from disaster to save one's life when his kith and kin are suffering:

वरं प्राणोच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ नी-२८ ॥
*अ: तुषार-अद्रेः सूनोः प्राण-उच्छेदः वरम् । पितरि उद्गच्छत्-बहुल-दहन-उद्गार-गुरुभिः स-मद-मघवन्-मुक्त-कुलिश-प्रहारैः क्लेश-विवशे पयसां पत्युः पयसि असौ सम्पातः न उचितः ।*
It would be better for Mainaka, the son of Himavat to breath his last. It is not proper that he should fall into the waters of the ocean when his father is in distress due to the strikes of thunder bolt released by Indra accompanied by the loud noises of the fire. [ The poet refers to the mythological story of Mainaka taking shelter in the ocean to avoid the thunder bolts of Indra.]

The poet puns on the word “paada”:
यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ नी-२९ ॥
*अ: इन-कान्तः अचेतनः अपि सवितुः पादैः स्पृष्टः प्रज्वलति (इति) यत् , तत् तेजस्वी पुरुषः पर-कृत-निकृतिं कथं सहते (इति द्योतयति) ।*
The lens though lifeless fires up when touched by the rays (feet) of the sun. How can a powerful person tolerate wicked conduct of another person?

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः ॥ नी-३० ॥
*अ: सिंहः शिशुः अपि मद-मलिन-कपोल-भित्तिषु गजेषु निपतति । सत्त्ववतां इयं प्रकृतिः, तेजसां वयः हेतुः न खलु ।*
Even a lion’s cub attacks elephants whose temples have become dirty due to the flow of ichor. It is the nature of the powerful; age is not a reason for valorous action.

## अर्थपद्धतिः

( Section on money matters)

जातिर्यातु रसातलं गुणगणस्तत्राप्यधो गच्छतां
शीलं शैलतटात्पतत्वभिजनो सन्दह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ नी-३१ ॥
*अ: जातिः रसातलं यातु, गुण-गणः तत्र अपि अधः गच्छताम्, शीलं शैल-तटात् पततु, अभिजनः वह्निना सन्दह्यताम्, वैरिणि शौर्ये वज्रम् आशु पततु, येन एकेन विना इमे समस्ताः गुणाः तृण-लव-प्रायाः (सः) अर्थः केवलम् नः अस्तु,*
Let caste go to the nether world, let the group of virtues go further down, let good conduct fall from the plateau of a mountain, let noble descent burn in fire, let money only be with us without which all these qualities are just worthless ( a tiny bit of grass).

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ नी-३२ ॥
*अ: यस्य वित्तम् अस्ति सः नरः कुलीनः,सः श्रुतवान् पण्डितः, सः गुणज्ञः, सः एव वक्ता, सः दर्शनीयः च, सर्वे गुणाः काञ्चनम् आश्रयन्ति ।*

Who has money becomes a person of high descent , a scholar well-versed in scriptures, one who values good qualities, an orator and a handsome person. All qualities seek refuge in Gold.

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालनात्
विप्रोऽनध्ययनात् कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयात्
मैत्री चाप्रणयात् समृद्धिरनयात् त्यागात् प्रमादाद्धनम् ॥ नी-३३ ॥
*अ: नृपतिः दौर्मन्त्र्यात् विनश्यति, यतिः सङ्गात्, सुतः लालनात्, विप्रः अनध्ययनात्, कुलं कु-तनयात्, शीलं खल-उपासनात्, ह्रीः मद्यात्, कृषिः अपि अनवेक्षणात्, स्नेहः प्रवास-आश्रयात्, मैत्री अप्रणयात्, समृद्धिः अनयात्, धनं प्रमादात् त्यागात् च (विनश्यति) ।*
A king gets destroyed due to bad counselling, an ascetic due to his associates, a son due to pampering, a Brahmin due to neglect of studies, a family due to a bad son, ones conduct due to bad company, sense of shame due to drinking, agriculture due to inattention, love due to being away, friendship due to lack of affection, opulence due to wrong policies, money due to mistakes and being very charitable.

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ नी-३४ ॥
*अ: वित्तस्य तिस्रः गतयः भवन्ति, दानं भोगः नाशः । यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति ।*
There are three paths for money: giving away, enjoying or loss. A person who neither gives away or enjoys will have the third option.

मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥ नी-३५ ॥
*अ: शाण-उल्लीढः मणिः, हेति-दलितः समर-विजयी, शरदि आश्यान-पुलिना सरित्, कला-शेषः चन्द्रः, सुरत-मृदिता बाल-वनिता, अर्थिषु गलित-विभवाः नराः तनिम्ना शोभन्ते ।*
A gem polished by a grinding stone, a conqueror in the battle wounded by a weapon, a river with dried up sand in autumn, moon  with only a sixteenth part visible, a young damsel exhausted by amorous dalliances, men who have lost a fortune by giving away to the deserving, all these appear lustrous in their leanness.

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णः कलयति धरित्रीं तृणसमाम् ।
अतश्चानेकान्ता गुरुलघुतयार्थेषु धनिनाम्
अवस्था वस्तूनि प्रथयति च संकोचयति च ॥ नी-३६ ॥

*अ: परिक्षीणः कश्चित् यवानां प्रसृतये स्पृहयति, पश्चात् सम्पूर्णः सः धरित्रीं तृणसमां कलयति ।अतः धनिनाम् अवस्थाः अर्थेषु गुरु-लघुतया अनेकान्ताः (सन्तः) वस्तूनि प्रथयति सङ्कोचयति च ।*
One who has lost everything wishes for a handful of corn; later when he becomes rich he considers landed property as straw. Thus the state of a wealthy person being high or low expands or contracts (the value of) things.

राजन् दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपुष्यमाणे
नानाफलं फलति कल्पलतेव भूमिः ॥ नी-३७ ॥
*अ: (हे) राजन्! एनां क्षितिधेनुं यदि दुधुक्षसि, तेन अद्य इमं लोकं वत्सम् इव पुषाण । तस्मिन् सम्यक् परिपुष्यमाणे भूमिः कल्पलता इव नाना-फलम् अनिशं फलति ।*
O king! If you want to milk the cow called earth, you first take care of the people as you would a calf. If they are well taken care of, the earth will give you fruits all the time like the Celestial Tree (kalpavrisha).

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ नी-३८ ॥
*अ: नृप-नीतिः सत्या अनृता च, परुषा प्रिय-वादिनी च, हिंस्रा दयालुः अपि, अर्थ-परा वदान्या च, नित्य-ब्यया प्रचुर-नित्य-धन-आगमा च, वाराङ्गना इव अनेक-रूपा ।*
Political conduct takes different forms like a prostitute: sometimes true, sometimes false; sometimes harsh, sometimes pleasant; sometimes violent, sometimes kind; sometimes miserly, sometimes liberal; sometimes a spend-thrift, sometimes extracting.

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ नी-३९ ॥
*अ: हे पार्थिव! येषाम् एते षड्-गुणाः, आज्ञा कीर्तिः ब्राह्मणानां पालनं दानं भोगः मित्र-संरक्षणं च न प्रवृताः, तेषां -उपाश्रयेण कः अर्थः?*
O king! What is the use of seeking shelter under a king who is devoid of these six qualities; Ability to command, fame, taking care of Brahmins, charity, ability to enjoy life and protecting friends?

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद् वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः

कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ नी-४० ॥
*अ: (नरः) धात्रा यत् निज-भाल-पट्ट-लिखितं स्तोकं वा महत् धनं तत् मरुस्थले अपि नितरां प्राप्नोति, अतः अधिकं मेरौ च न (प्राप्नोति) । (हे नर!), तत् धीरः भव, वित्तवत्सु वृथा कृपणां वृत्तिं मा कृथाः । पश्य, घटः कूपे पयोनिधौ अपि तुल्यं जलं गृह्णाति ।*

A person gets even in a desert whatever wealth has been written on his forehead whether small or large, and does not get anything more even on mount Meru. Therefore, man! Be brave, do not unnecessarily feel jealous of the wealthy. Look, a pot holds the same amount of water whether in a well or in an ocean.

## दुर्जनपद्धतिः

(Section on the wicked)

अकरुणत्वमकारणविग्रहः
परधने परयोषिति स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ नी-४१ ॥
*अ: अकरुणत्वम्, अ-कारण-विग्रहः, पर-धने पर-योषिति स्पृहा, सुजन-बन्धुजनेषु असहिष्णुता, दुरात्मनां इदं प्रकृति-सिद्धं हि ।*
Being unkind, quarrelling without any reason, desire for others’ money or women, impatience towards good people and relatives; these qualities come naturally to the wicked.

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ नी-४२ ॥
*अ: दुर्जनः विद्यया अलङ्कृतः अपि परिहर्तव्यः । असौ मणिना भूषितः सर्पः न भयङ्करः किम्?*
A wicked person even if he is educated has to be neutralized; Is not a snake adorned with gem not fearsome? [ There is a myth that certain snakes carry a gem in their hoods.]

जाड्यं ह्रीमति गण्यते व्रतशुचौ दम्भः शुचौ कैतवम्
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तव्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥ नी-४३ ॥
*अ: ह्रीमति जाड्यं, व्रतशुचौ दम्भः, शुचौ कैतवम्, शूरे निर्घृणता, मुनौ विमतिता, प्रियालापिनि दैन्यम्, तेजस्विनि अवलिप्तता, स्थिरे वक्तव्यशक्तिः मुखरता गण्यते । गुणिनां सः कः नाम गुणः भवेत् यः दुर्जनैः न अङ्कितः?*

Shyness is considered as lethargy, purity in matters of religious vows is taken to be hypocrisy, being scrupulous in cleanliness is taken as deceit, being valorous is taken as

being unkind, being a hermit is considered stupidity, being courteous is taken to be servility, being energetic is treated as arrogance, ability to speak in matters of conviction is taken as garrulousness. Is there any quality of a virtuous person which is not branded by the wicked?

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं बलेन महिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ नी-४४ ॥
*अ: यदि लोभः अस्ति, अगुणेन किम्? यदि पिशुनता अस्ति पातकैः किम्? सत्यं चेत् तपसा किम्? शुचि मनः यदि अस्ति तीर्थेन किम्? सौजन्यं यदि अस्ति बलेन किम्? महिमा यदि अस्ति मण्डनैः किम्? सद्विद्या यदि अस्ति धनैः किम्? अपयशः यदि अस्ति मृत्युना किम्?*
If there is greed where is the need for bad qualities? If one slanders where is the need for sins? If one is truthful where is the need for doing penance? If one has purity in mind where is the need for pilgrimage? If there is benevolence where is the need for force? If one is great where is the need for ornaments? If there is right knowledge where is the need for money? If there is infamy where is the need for death?

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतिः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्तशल्यानि मे ॥ नी-४५ ॥
*अ: दिवस-धूसरः शशी, गलित-यौवना कामिनी, विगत-वारिजं सरः, सु-आकृतेः अनक्षरं मुखम्, धन-परायणः प्रभुः, सतत-दुर्गतिः सज्जनः, नृप-अङ्गण-गतः खलः, (इमानि) मे मनसि सप्त-शल्यानि*
Moon looking grey in day time, a passionate lady past her prime, a lake with water-lilies dried out, handsome face of an illiterate person, a lord who is after wealth, a virtuous person in dire straits all the time, a wicked courtier to a king, these seven hurt my mind.

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ नी-४६ ॥
*अ: चन्ड-कोपानां भू-भुजां न कः अपि आत्मीयो नाम । पावकः स्पृष्टः जुह्वानं होतारम् अपि दहति ।*
Kings whose anger is terrible do not consider any one as their own. Even the sacrifice priest gets burnt by the fire if touched while offering oblations.

मौनान्मूर्खः प्रवचनपटुर्वाचको जल्पको वा
धृष्टः पार्श्वे भवति च वसन्दूरतोऽप्यप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः

सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ नी-४७ ॥
*अ: मौनात् मूर्खः (भवति), वा प्रवचन-पटुः वाचकः जल्पकः (भवति), पार्श्वे वसन् धृष्टः भवति, दूरतः वसन् अपि अ-प्रगल्भः (भवति), क्षान्त्या भीरुः (भवति), यदि न सहते प्रायशः न अभिजातः, सेवा-धर्मः परम-गहनः योगिनाम् अपि अगम्यः ।*
Silence is taken as a mark of being a fool; if one is skilled in talking it is considered as a mark of being talkative; if one stays near it is taken as a sign of being impudent; if one stays away it is taken as a mark of diffidence; if one displays forbearance it is taken as a mark of being timid; if one does not endure it is taken as a mark of lack of culture. Servitude is extremely hard to be understood and is not amenable even to ascetics.

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्रोद्गाढविस्मृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥ नी-४८ ॥
*अ: उद्भासित-अखिल-खलस्य विशृङ्खलस्य प्रोद्गाढ-विस्मृत-निज-अधम-कर्म-वृत्तेः दैवात् अवाप्त-विभवस्य अस्य गुणद्विषः नीचस्य गोचर-गतैः कैः सुखम् आस्यते?*
Who can ever feel comfortable before a wicked man because of whom wicked people flourish, who is unfettered, who has totally forgotten all his wicked acts, who detests good qualities and who has attained eminence due to a quirk of fate?

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ नी-४९ ॥
*अ: खल-सज्जनानां मैत्री दिनस्य पूर्व-अर्ध-पर-अर्ध-भिन्ना छाया इव आरम्भ-गुर्वी क्रमेण क्षयिणी, पुरा लघ्वी पश्चात् वृद्धिम् उपैति ।*
Friendship with virtuous persons is like the shadow in the afternoon small at the start and grows later while friendship with wicked persons is like the shadow in the forenoon starts strong and decreases steadily.

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणमेव वैरिणो जगति ॥ नी-५० ॥
*अ: जगति तृण-जल-सन्तोष-विहित-वृत्तीनां मृग-मीन-सज्जनानां लुब्धक-धीवर-पिशुना निष्कारणम् एव वैरिणः (भवन्ति) ।*
The hunter, fisherman and the backbiter are enemies of deer, fish and virtuous persons respectively for no reason.

## सुजनपद्धतिः

( On persons of virtue)

वाञ्छा सज्जनसङ्गतो परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादात्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलैः
एते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नमः ॥ नी-५१ ॥
अ: सज्जनसङ्गतः वाञ्छा, परगुणे प्रीतिः, गुरौ नम्रता, विद्यायां व्यसनम्, स्व-योषिति रतिः, लोक-अपवादात् भयम्, शूलिनि भक्तिः, आत्म-दमने शक्तिः, खलैः संसर्ग-मुक्तिः, एते निर्मल-गुणाः येषु वसन्ति, तेभ्यः महद्भ्यः नमः ।
My salutations to those great persons who have these blemish-less qualities: a desire for the company of good people, love for others' good qualities, humility before preceptor, assiduous devotion to education, love for one's wife, fear of public disapproval, devotion to Shiva, ability to control oneself and deliverance from the company of the wicked.

विपदि धैर्यमथाभ्युदयॆ क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ
प्रकितिसिद्धमिदं हि महात्मनाम् ॥ नी-५२ ॥
*अ: विपदि धैर्यम्, अथ अभ्युदयॆ क्षमा, सदसि वाक्पटुता, युधि विक्रमः,यशसि च अभिरतिः व्यसनं श्रुतौ, इदं महात्मनां प्रकृतिसिद्धं हि ।*
Courage in times of difficulties, compassion towards others in times of affluence, oratory in a conference, valour in a battle, desire for fame, passion for learning the Vedas; these qualities come naturally to great men.

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयोः
विनाप्यैश्वर्येन प्रकृतिमहतां मण्डनमिदम् ॥ नी-५३ ॥
*अ: करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, भुजयोः विजयि अतुलं वीर्यम्, हृदि स्वच्छा वृत्तिः, श्रवणयोः अधिगतं श्रुतं च, ऐश्वर्येन विना अपि प्रकृति-महताम् इदं मण्डनम् ।*
These are ornaments even without wealth for those who are naturally great: laudable renunciation for the hand, an attachment to the feet of the preceptor for the head, truthful voice for the mouth, incomparable and victorious valour for the shoulders, clean conduct for the heart, and Vedas acquired for the ears.

प्राणाघातान्निनिवृत्तिः परधनहरणे संयमः सत्यवाक्यं

काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा-
सामान्यं सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ नी-५४ ॥
*अ: प्राण-आघातात् निवृत्तिः, पर-धन-हरणे संयमः, सत्य-वाक्यं, काले शक्त्या प्रदानं, परेषाम् युवतिजनकथामूकभावः, तृष्णा-स्रोतः-विभङ्गः, गुरुषु च विनयः, सर्व-भूत-अनुकम्पा-सामान्यं सर्वशास्त्रेषु अनुपहत-विधिः श्रेयसाम् एषः पन्थाः ।*
Keeping away from violence to living beings, restraint in coveting others' wealth, truthful speech, donating at the proper time as per ability, being dumb to talk of others about young women, interrupting the stream of avarice, humility in the presence of elders, general compassion toward all beings, vast knowledge of all scriptures, these indeed form the route to prosperity.

सम्पत्सु महतां चित्तं भवेदुत्पलकोमलम् ।
आपत्सु च महाशैलशिलाशङ्घातकर्कशम् ॥ नी-५५ ॥
*अ: महतां चित्तं सम्पत्सु उत्पल-कोमलं, आपत्सु महा-शैल-शिला-सङ्घात-कर्कशं भवेत् ।*
The heart of great persons becomes as soft as a lotus when in affluence, becomes as hard as a rock of a granite hill when in adversity.

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः ।
विपद्युच्चैर्धैर्यं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ नी-५६ ॥
*अ: प्रिया न्याय्या वृत्तिः, असु-भङ्गे अपि मलिनम् असुकरम्, अ-सन्तः न अभ्यर्थ्याः, सुहृत् अपि कृश-धनः न याच्यः, विपदि धैर्यम् उच्चैः, महतां पदम् अनुविधेयम्, इदं विषमम् असि-धारा-व्रतम् सतां केन उद्दिष्टम्?*
Conduct which is pleasant and lawful, not indulging in filthy ways even at the cost of one's life, not seeking help from the wicked, great fortitude in times of adversity, following the foot-steps of the Great, not seeking favours from a person of low means even if he is a friend; who ordained for the virtuous persons this type of sword-edge austerity?

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ नी-५७ ॥
*अ: प्रच्छन्नं प्रदानम्, गृहम् उपगते सम्भ्रम-विधिः, प्रियं कृत्वा मौनम्, सदसि उपकृतेः च कथनम्, लक्ष्म्याम् अनुत्सेकः, पर-कथाः निरभिभव-साराः, इदं विषमम् असि-धारा-व्रतं सतां केन उद्दिष्टाम्?*
Donating privately, an enthusiastic welcome when a person arrives at home, being silent after doing pleasing things, to narrate the help rendered by others in gatherings,

being disinterested in wealth, narrating others affairs without hurting them; who ordained for the virtuous persons this type of sword-edge austerity?

सन्तप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं दृश्यते ।
अन्तःसागरशुक्तिमध्य पतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमजुषामेवं विधा वृत्तयः ॥ नी-५८ ॥
*अ: सन्तप्त-अयसि संस्थितस्य पयसः नाम अपि न श्रूयते; तत् एव नलिनी-पत्र-स्थितं मुक्त-आकारतया दृश्यते; तत् अन्तः-सागर-शुक्ति-मध्य-पतितं मौक्तिकं जायते; प्रायेण अधम-मध्यम-उत्तम-जुषां वृत्तयः एवं विधाः ।*
Nothing is heard of water on heated iron; the same water looks like a pearl on the leaf of a lotus plant; it becomes a pearl when it falls into an oyster shell; perhaps this is how a person's surroundings decide his status of being bad, medium or good.

यः प्रीणयेत्सुचरितैः पितरं स पुत्रः
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यत्
एतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ नी-५९ ॥
अ: यः सु-चरितैः पितरं प्रीणयति सः पुत्रः; यत् भर्तुः एव हितम् इच्छति तत् कलत्रम्; यत् आपदि सुखे च सम-क्रियं तत् मित्रम्; जगति पुण्य-कृतः एतत् त्रयं लभन्ते ।
He is indeed a son who pleases his father with his good conduct; she is indeed a wife who wishes for the welfare of her husband; He is indeed a friend who is equally affected during good and bad times; those blessed in this world are endowed with all these three.

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान्ख्यापयन्तः
स्वार्थान् सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् दुःखयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥ नी-६० ॥
*अ: नम्रत्वेन उन्नमन्तः, पर-गुण-कथनैः स्वान् गुणान् ख्यापयन्तः, पर-अर्थे वितत-पृथुतर-आरम्भ-यत्नाः स्व-अर्थान् सम्पादयन्तः, क्षान्त्या एव आक्षेप-रूक्ष-अक्षर-मुखान् दुर्जनान् दुःखयन्तः आश्चर्य-चर्याः बहुमताः जगति कस्य न अभ्यर्चनीयाः?*
Reaching a lofty state by being humble, declaring one's own qualities by talking of other's good qualities, achieving one's own objectives by striving to meet the requirements of others, bringing to grief wicked persons by their ability to endure: who in this world will not revere people of such astonishing conduct ?

## परोपकारपद्धतिः

(Section on service to others)

भवन्ति नम्राः तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकरिणाम् ॥ नी-६१ ॥
अ: तरवः फलोद्गमैः नम्राः भवन्ति, घनाःनवाम्बुभिः दूरविलम्बिनः (भवन्ति), सत्पुरुषाः समृद्धिभिः अनुद्धताः, परोपकरिणाम् एष एव स्वभावः ।
Trees bend low when laden with fruits; clouds laden with fresh water hang over long distances; wealth does not make persons of virtue arrogant; this is the nature of those who are in the service of others.

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्नतु कङ्कणेन ।
विभाति कायः करुणाकुलानां
परोपकारेण न चन्दनेन ॥ नी-६२ ॥
अ: श्रोत्रं श्रुतेन एव विभाति, कुण्डलेन न; पाणिः दानेन विभाति तु कङ्कणेन न; करुणाकुलानां कायः परोपकारेण विभाति, चन्दनेन न ।
Ears look lustrous because of hearing divine matters and not because of ear-rings; hand looks lustrous because of giving not because of bracelet ; the body of those who are agitated with sympathy looks lustrous because of service to others and not due to smearing of sandal paste.

पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहिताभियोगाः ॥ नी-६३ ॥
अ: दिनकरः पद्माकरं विकचं करोति,चन्द्रः कैरव-चक्रवालम् विकासयति, जलधरः न अभ्यर्थितः अपि जलं ददाति; सन्तः परहिते स्वयं विहित-अभियोगाः ।
Sun opens up the assemblage of lotuses; moon makes the pool of white lotuses bloom; cloud gives water even when not requested; good persons are engaged in serving others on their own.

एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ नी-६४ ॥

*अ: ये स्वार्थान् परित्यज्य पर-अर्थ-घटकाः एते सत्पुरुषाः; ये स्वार्थ-अविरोधेन परार्थम् उद्यम-भृतः तु सामान्याः; ये स्वार्थाय परहितं निघ्नन्ति ते अमी मानुषराक्षसाः*
*ये निरर्थकं परहितं तु घ्नन्ति ते के न जानीमहे ।*
Those who sacrifice their self-interest and indulge in serving others are the persons of virtue; they who work for others' cause without hindering their self –interest are ordinary; those who destroy the interests of others for their own self-interest are demons in human form; we do not know who they are who kill others' interests without any reason.

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्ताः ॥ नी-६५ ॥
*अ: पापात् निवारयति, हिताय योजयते, गुह्यं निगूहति, गुणान् प्रकटीकरोति ,आपद्गतं च न जहाति, काले ददाति सन्तः इदं सन्मित्रलक्षणम् प्रवदन्ति ।*
He prevents committing sin, he engages you towards salutary action, he keeps secret what needs to be kept secret, he publicises good deeds, he takes care of those who seek his shelter, he gives (what needs to be given) in time. Such are the qualities of a good friend according to virtuous people.

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ नी-६६ ॥
*अ: पुरा क्षीरेण आत्मगत-उदकाय ते अखिलाः गुणाः दत्ताः हि, क्षीर-उत्तापम् अवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः, मित्रापदं दृष्ट्वा पावकं गन्तुं उन्मनः तत् अभवत् ,*
*तेन जलेन युक्तं शाम्यति, सतां मैत्री पुनः तु ईदृशी ।*
Long back milk gave away all its qualities to water which forms a part of milk; that water sacrificed itself in fire when it found milk getting burnt; seeing its friend in distress milk went up to get into fire; that is why milk cools down when water id added; such is the friendship of good people.[ Poet sees the quality of good friendship in the natural process of boiling milk.]

इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्
इतश्च शरणार्थिनां शिखरिणां गणाः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकैः
अहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ नी-६७ ॥
*अ: इतः केशवः स्वपिति, इतः तदीय-द्विषां कुलम्, इतः च शरण-अर्थिनां गणाः शेरते, इतः अपि समस्त-संवर्तकैः सह वडवानलः, सिन्धोः वपुः विततम्,ऊर्जितं, भर-सहं च, अहो ।*

Here sleeps Vishnu, here the family of his enemies, here sleep those who seek his shelter, here is the sub-oceanic fire Vadava along with the world-annihilating fires; how wide, energetic and capable of bearing load the body of the ocean is!

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम् ।
सञ्जातव्यर्थपक्षाः परहितकरणे नोपरिष्ठाच्च चाधो
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥ नी-६८ ॥
*अ: सः कूर्मः येन पृष्ठं पृथु-भुवन-भराय अर्पितम् एकः; यत्र तेजस्वि-चक्रं नियमितं भ्रमति ध्रुवस्य जन्म श्लाघ्यम्; अपरे जन्तवः पर-हित-करणे सञ्जात-व्यर्थ-पक्षाः, न उपरिष्ठात्, न च अधः ब्रह्माण्ड-उदुम्बर-अन्तः-मशकवत् ।*
There was only one tortoise whose back was dedicated to carrying the weight of the heavy earth; the life of Dhruva is indeed laudable around whom the bright stars revolve regularly; others are neither above nor below like flies in Udumbara (native fig) fruit-like universe being of no use in helping others.

तृष्णां छिन्दि भज क्षमां जहि मदं पापे मतिं मा कृथाः ।
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं
कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितम् ॥ नी-६९ ॥
*अ: तृष्णां छिन्दि, क्षमां भज, मदं जहि, पापे मतिं मा कृथाः, सत्यं ब्रूहि, साधु-पदवीम् अनुयाहि, विद्वत्-जनं सेवस्व, मान्यान् मानय, विद्विषः अपि अनुनय, प्रश्रयं प्रख्यापय, कीर्तिं पालय, दुःखिते दयां कुरु, एतत् सतां चेष्टितम् ।*
Cut asunder greed, be forgiving, destroy haughtiness, do not indulge in sins, be truthful, follow leading saints, serve scholars, respect those worthy of respect, get along with even your adversaries, spread civility, protect your fame, show compassion towards those grieved. This is the conduct of persons of virtue.

मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ नी-७० ॥
*अ: मनसि वचसि काये पुण्य-पीयूष-पूर्णाः त्रिभुवनम् उपकार-श्रेणिभिः प्रीणयन्तः परगुण-परमाणून् नित्यं पर्वतीकृत्य निज-हृदि विकसन्तः सन्तः कियन्तः सन्ति?*
How many saintly persons are there who are full of the ambrosia of meritorious acts, who please all the three worlds with a series of benefits and who after making a mountain of the miniscule good qualities of others feel satisfied in their heart?

## धैर्यपद्धतिः

( Section on courage)

रत्नैर्महाब्धेस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति वीराः ॥ नी-७१ ॥
*अ: देवाः महा-अब्धेः रत्नैः न तुतुषुः, भीम-विषेण भीतिं न भेजिरे, सुधां विना विरामं न प्रययुः । वीराः निश्चित-अर्थात् न विरमन्ति ।*
The divine beings were not satisfied with the gems from the ocean, were not frightened by the terrible poison, did not rest till they got ambrosia. The brave do not stop till they attain their goal.

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ नी-७२ ॥
*अ: नीचैः विघ्न-भयेन न प्रारभ्यते खलु, मध्याः प्रारभ्य विघ्न-निहताः विरमन्ति, उत्तम-गुणाः मुहुः मुहुः विघ्नैः प्रतिहन्यमानाः अपि प्रारब्धं न परित्यजन्ति ।*
Persons of inferior rank do not start the work fearing obstructions; persons of middle rank start and stop when obstructions come their way; persons of superior rank do not leave a work started despite obstructions coming their way again and again.

क्वचित्पृथ्वीशय्यः क्वचिदपि पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ नी-७३ ॥
*अ: क्वचित् पृथ्वी-शय्यः, क्वचित् अपि पर्यङ्क-शयनः, क्वचित् शाक-आहारः, क्वचित् अपि शाल्योदन-रुचिः, क्वचित् कन्ता-धारी, क्वचित् अपि दिव्य-अम्बर-धरः, मनस्वी कार्यार्थी दुःखं न गणयति, सुखं न गणयति ।*
An intelligent person determined to attain his objective does not care for comforts or discomforts that come his way; he sleeps on the floor sometimes, he sleeps on a couch sometimes; he subsists on just vegetables sometimes, he has meal made of  boiled rice sometimes; he is sometimes dressed in rags, sometimes wears divine clothing.

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा

न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ नी-७४ ॥
*अ: यदि नीति-निपुणाः निन्दन्तु वा स्तुवन्तु, लक्ष्मीः यथा-इष्टं समाविशतु वा गच्छतु,मरणम् अद्य एव वा युग-अन्तरे अस्तु, धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ।*
The brave do not deviate from the path of correct conduct irrespective of whether experts in moral behaviour praise him or criticize him; whether wealth goes away or comes in at its own will; whether death occurs today or aeons later.

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
तर्षन्ति भूरिविषयाश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ नी-७५ ॥
*अ: यस्य चित्तं कान्ता-कटाक्ष-विशिखाः न लुनन्ति, कोप-कृशानु-तापः चित्तं न निर्दहति, (यं) लोभ-पाशाः भूरि-विषयाः च न तर्षन्ति सः धीरः इदं कृत्स्नं लोक-त्रयं जयति ।*
He indeed is brave whose mind is not severed by the arrows of his beloved’s glances and is not burnt in the fire of anger, and who will not be tempted by the snares of greed or heavy sensual attractions. He will conquer the three worlds.

कदर्थितस्यापि हि धैर्यवृत्तेः
न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्नेः
नाधः शिखा यान्ति कदाचिदेव ॥ नी-७६ ॥
*अ: धैर्यवृत्तेः कदर्थितस्य अपि धैर्यगुणः प्रमार्ष्टुं न शक्यते । वह्नेः अधोमुखस्य कृतस्य अपि शिखाः कदाचित् एव अधः न यान्ति ।*
Fortitude of a brave person cannot be obliterated even if he is despised. The flames of a fire even if held down do not grow downwards.

वरं शृङ्गोत्सङ्गाद्गुरुशिखरिणः क्वापि विषमे
पतित्वायं कायः कठिनदृषदन्ते विगलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ नी-७७ ॥
*अ : अयं कायः गुरु-शिखरिणः शृङ्ग-उत्सङ्गात् क्व अपि विषमे कठिण-दृषद्-अन्ते पतित्वा विगलितः वरम्, हस्तः तीक्ष्ण-दशने फणि-पति-मुखे न्यस्तः वरम्, वह्नौ पातः वरम्, तत् अपि शील-विलयः न कृतः ।*
It is better that this body gets broken by falling on some hard rock from a cliff of a high mountain, it is better that the hand is thrust into the mouth of a big snake with sharp fangs, it is better to jump into fire, ones morality should not get lost.

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।

व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतरं शीलं समुन्मीलति ॥ नी-७८ ॥
*अ: यस्य अङ्गे अखिल-लोक-वल्लभतरं शीलं समुन्मीलति, तस्य वह्निः जलायते, जलनिधिः कुल्यायते, तत्क्षणात् मेरुः स्वल्पशिलायते, मृगपतिः सद्यः कुरङ्गायते, व्यालः माल्य-गुणायते, विष-रसः पीयूष-वर्षायते ।*
Fire becomes water, ocean becomes a small canal, mountain Meru becomes a small rock, lion becomes a deer, a serpent becomes a garland and poison becomes ambrosia for a person in whom morality adored by the whole world shines.

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न लोकेषु ॥ नी-७९ ॥
अ: *सन्तः "तरुः छिन्नः अपि रोहति, चन्द्रः क्षीणः अपि पुनः उपचीयते" इति विमृशन्तः लोकेषु न सन्तप्यन्ते ।*
Wise persons do not grieve in this world understanding that a tree that has been felled grows again and that the moon which wanes expands again.

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमः
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ नी-८० ॥
अ: *सुजनता ऐश्वर्यस्य विभूषणं, वाक्संयमः शौर्यस्य, उपशमः ज्ञानस्य, विनयः श्रुतस्य, पात्रे व्ययः वित्तस्य, अक्रोधः तपसः, क्षमा प्रभवितुः, निर्व्याजता धर्मस्य, सर्वेषाम् अपि सर्वकारणम् इदं शीलं परं भूषणम् ।*
Good conduct is an ornament for wealth, restraint in speech is an ornament for valour, mental tranquillity for wisdom, humility for scholarship, spending for the right cause for money, not getting angry for penance, ability to pardon for a capable person, being unbiased for righteous conduct; this morality is an ornament for one and all.

## दैवपद्धतिः

Section on Destiny

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वारणः ।
इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ नी-८१ ॥
अ: *यस्य नेता बृहस्पतिः, प्रहरणं वज्रं, सैनिकाः सुराः, दुर्गं स्वर्गो, अनुग्रहः खलु हरेः, वारणः ऐरावतः, इति आश्चर्यबलान्वितः अपि बलभित् सङ्गरे परैः भग्नः, तत् व्यक्तं ननु शरणं दैवम् एव पौरुषम् वृथा, धिक् धिक् ।*

Even Indra, whose leader is Bruhaspati, whose weapon is Vajra, whose army consists of Divine persons, whose fort is heaven,  whose elephant is Airavata and who has the blessings of Lord Vishnu was defeated by his enemies in battle; it is quite clear that destiny is the refuge and valour is of no use, what a pity!

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्ते मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि परं वृद्धौ क्षये कारणम् ॥ नी-८२ ॥
*अ: आखुः (करण्डस्य) विवरं कृत्वा भग्न-आशस्य करण्ड-पिण्डित-तनोः क्षुधा म्लान-इन्द्रियस्य भोगिनः मुखे स्वयं निपतितः । असौ (भोगी) तत्-पिशितेन तृप्तः तेन एव पथा सत्वरं यातः । स्वस्थाः तिष्ठत । वृद्धौ क्षये हि दैवम् एव परं कारणम् ।*
After making a hole in the basket a mouse falls into the mouth of a snake which has its body curled into a heap in the basket and whose senses are weakened because of hunger. The snake having had a satisfying meal of the mouse gets out of the same hole quickly. You people! Keep quiet.  Fate is the only cause for growth or decay.

यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ नी-८३ ॥
*अ: आर्यः पतन् अपि कन्दुकपातेन यथा उत्पतति, अनार्यः तु मृत्-पिण्ड-पतनं यथा तथा पतति ।*
A gentleman bounces back like a ball after a fall. An uncultured person falls down like a heap of mud (never to bounce back).

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापिते मस्तके
गच्छन्देशमनातपं द्रुतगतिस्तालस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ॥ नी-८४ ॥
*अ: खल्वाटः मस्तके दिवस-ईश्वरस्य किरणैः सन्तापिते, द्रुत-गतिः अनातपं देशं गच्छन् तालस्य मूलं गतः । तत्र अपि अस्य शिरः पतता महा-फलेन सशब्दं भग्नम् । प्रायः यत्र दैव-हतकः गच्छति तत्र एव आपदः यान्ति ।*
A bald person, with his head burning due to the heat of the sun, seeks a shady place and quickly goes to the base of a pine tree. There his head gets broken by a falling big pine fruit. Perhaps misfortune follows an unfortunate person wherever he goes.

गजभुजङ्गविहङ्गमबन्धनं
शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ नी-८५ ॥

*अ: गज-भुजङ्ग-विहङ्गम-बन्धनं शशि-दिवाकरयोः ग्रह-पीडनं मतिमतां दरिद्रतां च विलोक्य अहो विधिः बलवान् इति मे मतिः ।*
After seeing that elephants, snakes and birds are kept captive, that planets torment the sun and the moon and that learned persons live in penury I believe that one's destiny is very powerful.

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलङ्करणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चेत्
अहह कष्टमपण्डितता विधेः ॥ नी-८६ ॥
*अ: (विधिः)अशेष-गुण-आकरं भुवः अलङ्करणं पुरुष-रत्नं सृजति तावत्, तत् अपि तत्-क्षण-भङ्गि करोति चेत् अहह कष्टं विधेः अपण्डितता ।*
If Fate creates a gem of a person who is an ornament for the world and who is a source of all good qualities and also makes him lasting for a few moments, what a pity that it is so un-informed.

अयममृतनिधानं नायकोऽप्योषधीनां
शतभिषगनुयातः शम्भुमूर्ध्नोऽवतंसः ।
विरहयति न चैनं राजयक्ष्मा शशाङ्कं
हतविधिपरिपाकः केन वा लङ्घनीयः ॥ नी-८७ ॥
*अ: अयम् अमृत-निधानं शत-भिषक्-अनुयातः शम्भु-मूर्ध्नः अवतंसः । एनं शशाङ्कं राज-यक्ष्मा न विरहयति च । हत-विधि-परिपाकः केन वा लङ्घनीयः ?*
This moon is a receptacle of ambrosia, is followed by hundreds of physicians (followed by Satabhishak star) and is a crest on the head of Shiva. (However) He is affected by the disease of consumption. Who can get over the effect of wretched Fate?

प्रियसख विपद्दण्डाघातप्रवातपरम्परा-
परिचयबले चिन्ताचक्रे निधाय विधिः खलः ।
मृदमिव बलात्पिण्डीकृत्य प्रगल्भकुलालवत्-
भ्रमयति मनो नो जानीमः किमत्र विधास्यति ॥ नी-८८ ॥
*अ: प्रियसख! खलः विधिःप्रगल्भ-कुलालवत् मनः विपत्-दण्डा-आघात-प्रवात-परम्परा-परिचय-बले चिन्ता-चक्रे निधाय मृदम् इव बलात् पिण्डीकृत्य भ्रमयति । अत्र किं विधास्यति नो जानीमः ।*
Dear friend! The mischievous Fate like a potter places (our) mind consolidating it into a heap like mud on the potter's wheel of worries which runs by the force of the stick of recurrent adversities and rotates it. What exactly he wants to make we do not know.

विरम विरमायासादस्माद्दुरध्यवसायतः
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ।
अयि जड विधे कल्पापायेऽप्यपेतनिजक्रमाः

कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥ नी-८९ ॥
*अ: अयि जड विधे ! अस्मात् दुर्-अध्यवसायतः आयासात् विरम विरम, यत् विपदि महतां धैर्य-ध्वंसम् ईक्षितुम् ईहसे । कल्प-अपाये अपि न अपेत-निज-क्रमाः कुल-शिखरिणः, एते क्षुद्रा जल-राशयः न वा ।*
You stupid Fate stop exerting yourself by trying to see if you could destroy the courage of great men. They are like mountains during the time of the end of Kalpa and they are not like insignificant streams.

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनमेन्मनागपि महानैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥ नी-९० ॥
*अ: प्रभुणा दैवेन स्वयं जगति यत् यस्य प्रमाणीकृतं तत् तस्य उपनमेत्, महान् आश्रयः न कारणम् एव । सर्व-आशा-परिपूरके जलधरे प्रत्यहं वर्षति अपि, सूक्ष्माः द्वित्राः एव पयो-बिन्दवः चातकमुखे पतन्ति ।*
What has been ordained by the Lord Fate is what any one gets and it is not because of his benefactor. Although clouds which fill all the directions rain every year, only a few tiny drops fall into the mouth of a Cataka bird.

## कर्मपद्धतिः

Section on Karma

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किमपरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ नी-९१ ॥
अ: देवान् नमस्यामः; हत-विधेः ते अपि वश-गाः ननु? विधिः वन्द्यः; सः अपि प्रति-नियत-कर्म-एक-फल-दः; फलं कर्म-आयत्तं यदि अपरैः किम्? विधिना च किम्? येभ्यः विधिः अपि न प्रभवति, तत्-कर्मभ्यः नमः ।
We salute the Divine Beings. But they are also affected by the wily Fate. So, we should salute Fate. But Fate also bestows according to one’s own actions. If fruits are as per actions, of what importance is Fate? Let us salute (our own) actions on which even Fate has no control.

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ नी-९२ ॥

अ: येन ब्रह्मा कुलालवत् नियमितः, येन विष्णुः ब्रह्माण्ड-भाण्ड-उदरः दशावतार-गहने महा-सङ्कटे क्षिप्तः, येन रुद्रः कपाल-पाणि-पुटके भिक्षाटनं सेवते, सूर्यः नित्यम् एव गगने भ्राम्यति, तस्मै कर्मणे नमः ।
Salutations to Karma, by whom Brahma is made to work like a potter, Vishnu is thrown into stressful cauldron of Brahmanda beset with ten incarnations, Shiva makes a living by begging with a bowl made of skull in his hand, and the sun wanders daily in the sky.

या साधूंश्च खलान्करोति विदुषो मूर्खान् हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥ नी-९३ ॥
अ: हे साधो! या खलान् च साधून् करोति, मूर्खान् विदुषः, द्वेषिणः हितान्, परोक्षं प्रत्यक्षं कुरुते, हालाहलं तत्-क्षणात् अमृतं कुरुते, वाञ्छितं फलं भोक्तुं तां भगवतीं सत्क्रियाम् आराधय, व्यसनैः विपुलेषु गुणेषु वृथा आस्थां मा कृथाः ।
Dear holy man! Worship that Goddess called Virtuous Action who converts bad persons to holy persons, dull headed persons into scholars, enemies into well wishers, renders what is not seen visible, converts instantaneously strongest poison into ambrosia. Do not go after other qualities which are full of weaknesses.

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते चिरमनुस्यूते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रश्यद्दिशो दृश्यताम् ॥ नी-९४ ॥
अ: शुभे कर्मणि चिरम् अनुस्यूते शुभ्रं सद्म स-विभ्रमाः युवतयः श्वेत-आतपत्र-उज्ज्वला लक्ष्मीः इति अनुभूयते, कर्मणि विच्छिन्ने लक्ष्मीः अनङ्ग-कलह-क्रीडा-त्रुटत्-कन्तुकं भ्रश्यत् मुक्ता-जालम् इव झट् इति नितरां दिशः प्रयाति । दृश्यताम् ।
If good actions are accumulated over a long period, a clean residence, graceful young women and Lakshmi, Goddess of Wealth brilliant with a white umbrella can all be experienced. If good actions are broken Lakshmi will go in different directions quickly like the beads of pearls slipping away in different directions from a necklace during amorous quarrel.

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्तेः
भवति हृदयदाही शल्यतुल्यो विपाकः ॥ नी-९५ ॥
*अ: गुणवत् अगुणवत् वा कार्य-जातं कुर्वता पण्डितेन यत्नतः परिणतिः अवधार्या ।*
*अति-रभस-कृतानां कर्मणां विपाकः आ-विपत्तेः शल्य-तुल्यः हृदय-दाही भवति ।*

A wise man has to endure with effort till maturity while doing his works, good or bad. The result of works done in great haste is heart wrenching and painful till one's end.

स्थाल्यां वैदूर्यमय्यां पचति तिलखलं चान्दनैरिन्धनौघैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कतूलस्य हेतोः ।
छित्वा कर्पूरखण्डान् वृतिमिहकुरुते कोद्रवाणां समन्तात्
प्राप्येमां कर्मभूमिं न भजति मनुजो यस्तपो मन्दभाग्यः ॥ नी-९६ ॥
*अ: यः मनुजः इमां कर्म-भूमिं प्राप्य तपः न भजति (सः) वैदूर्यमय्यां स्थाल्यां चान्दनैः इन्धन-ओघैःतिल-खलं पचति । अर्क-तूलस्य हेतोः सौवर्णैः लाङ्गल-अग्रैः वसुधां विलिखति । इह कर्पूर-खण्डान् छित्वा समन्तात् कोद्रवाणां वृतिं कुरुते ।*
A person who does not do penance having been born in this land of Karma is cooking sesame floor in a gem-laden vessel using sandal wood as fire wood. He ploughs the earth with a gold-tipped plough for the sake of the fibres of Arka plant. He constructs a fence of Kodrava plant after destroying a plot of Karpura plants.

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ नी-९७ ॥
*अ: पुरुषस्य आकृतिः एव न फलति, न कुलम् एव, न शीलं, न विद्या एव न च यत्न-कृता सेवा अपि । पूर्व-तपसा सञ्चितानि भाग्यानि यथा वृक्षाः (फलन्ति) तथा फलन्ति ।*
It is not the looks, heritage, character, education or service done with effort, but the good fortune accumulated due to previous penance which gives timely results like trees.

मज्जत्वम्भसि यातु मेरुशिखरं शत्रून्जयत्वाहवे
वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ नी-९८ ॥
*अ: (मनुजः) अम्भसि मज्जतु, मेरु-शिखरं यातु, शत्रून् आहवे जयतु, वाणिज्यं कृषि-सेवने सकलाः विद्याः कलाः शिक्षतु, परं प्रयत्नं कृत्वा खगवत् विपुलम् आकाशं प्रयातु । इह अभाव्यं न भवति, कर्म-वशतः भाव्यस्य नाशः कुतः?*
Let a person drown in water; let him go up the peak of mountain Meru; let him conquer enemies in battle; let him learn commerce, agriculture, art of serving others, all branches of knowledge and arts, let him fly over the sky like a bird after struggling much. But here (in this world) what is not predestined to happen will not happen and how can what has to happen as a result of karma get destroyed?

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।

सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुराकृतानि ॥ नी-९९ ॥
अ: वने रणे शत्रु-जल-अग्नि-मध्ये महा-अर्णवे पर्वत-मस्तके वा सुप्तं प्रमत्तं विषमस्थितं वा पुराकृतानि पुण्यानि रक्षन्ति ।
Good deeds done in the past will protect a person whether he is sleeping, intoxicated or in adversity in a forest, battle ground, amidst enemies, water or fire or on the top of a mountain.

भीमं वनं भवति यस्य पुरं प्रधानं
सर्वो जनो स्वजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ नी-१०० ॥
*अ: यस्य नरस्य पूर्व-सुकृतम् अस्ति, तस्य भीमं वनं प्रधानं पुरं भवति, सर्वः जनः स्वजनताम् उपयाति, कृत्स्ना भूः सन्निधि-रत्न-पूर्णा भवति ।*
For a person who has acquired good deeds in the past a frightening forest becomes a prominent city, all people get attached to him like relatives, the whole earth becomes full of treasure and gems.
॥ इति सुभाषितत्रिशत्यां नीतिशतकं सम्पूर्णम् ॥
End of Nitishatakam

# शृङ्गारशतकम्

## मङ्गलश्लोकः

**Benedictory verse**
शम्भुस्वयम्भुहरयो हरिणेक्षणानाम्
येनाक्रियन्त सततं गृहकुम्भदासाः ।
वाचामगोचरचरित्रविचित्रिताय
तस्मै नमो भगवते मकरध्वजाय ॥ शृ-१ ॥
अन्वयः: येन शम्भु-स्वयम्भु-हरयः हरिण-ईक्षणानां गृह-कुम्भ-दासाः सततम् अक्रियन्त, तस्मै वाचाम् अगोचर-चरित्र-विचित्रिताय भगवते मकरध्वजाय नमः ।
Salutation to the revered God of love, Manmatha, whose flag carries the picture of a fish, whose colourful life is beyond words and who has made Siva, Brahma and Vishnu carriers of household pitchers of doe-eyed ladies. [ Doe-eyed ladies refer to the wives of Siva, Brahma and Vishnu, namely Parvati, Saraswati and Lakshmi.]

## स्त्रीप्रशंसा

(In praise of women)

स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षणैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ शृ-२ ॥
*अ: स्त्रियः स्मितेन भावेन लज्जया पराङ्मुखैः अर्ध-कटाक्ष-वीक्षणैः वचोभिः ईर्ष्या-कलहेन लीलया समस्त-भावैः च बन्धनम् ।*
With their smile, temperament, shyness, partial glances while turning away their faces, words, quarrels out of jealousy, playfulness and with all their moods women are a fetter (to men).

भ्रूचातुर्यात् कुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जितान्ताश्च हासाः ।

लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चायुधं च ॥ शृ-३ ॥

*अ: भ्रू-चातुर्यात् कुञ्चित-अक्षाः कटाक्षाः, स्निग्धाः वाचः,लज्जित-अन्ताः हासाः च, लीला-मन्दं प्रस्थितं स्थितं च स्त्रीणाम् एतत् (सर्वं) भूषणम् आयुधं च ।*

Sideway glances due to the dexterity of the eye-brows, friendly talk, smiles ending with bashfulness, playful languidness in movement and posture, all this is both embellishment and weapon for ladies.

क्वचित्सभ्रूभङ्गैः क्वचिदपि च लज्जापरिगतैः
क्वचिद्भूरित्रस्तैः क्वचिदपि च लीलाविलसितैः ।
कुमारीणामेतैर्मदनसुभगैर्नेत्रवलितैः
स्फुरन्नीलाब्जानां प्रकरपरिकीर्णा इव दिशः ॥ शृ-४ ॥

*अ: क्वचित् स-भ्रू-भङ्गैः, क्वचित् अपि लज्जा-परिगतैः, क्वचित् भूरि-त्रस्तैः, क्वचित् अपि लीला-विलसितैः एतैः कुमारीणां मदन-सुभगैः नेत्र-वलितैः दिशः स्फुरत्-नील-अब्जानां प्रकर-परिकीर्णा इव (भान्ति) ।*

With the young ladies casting their passionately lovely glances sometimes accompanied by the knitting of the eye brows, sometimes filled with bashfulness, sometimes full of fear and sometimes playfully it looks as if heaps of shining blue lotuses are scattered in all directions.

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः ।
वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥ शृ-५ ॥

*अ: चन्द्रविकासि वक्त्रम्, पङ्कज-परीहास-क्षमे लोचने, स्वर्णम् अपाकरिष्णुः वर्णः, अलिनी-जिष्णुः कचानां चयः, इभ-कुम्भ-विभ्रम-हरौ वक्षोजौ, गुर्वी नितम्ब-स्थली, वाचां हारि मार्दवम् युवतिषु स्वाभाविकं मण्डनम् ।*

A face steadily broadening like moon, eyes which can put lotuses to shame, colour which outshines that of Gold, lock of hair which wins over (swarm of) female bees (in colour), bosoms which steal the grace of elephant’s frontal prominences, heavy hips and enticing sweetness in speech; these are natural adornments for young women.

स्मितं किञ्चिन्मुग्धं सरलतरलो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ।
गतानामारम्भः किसलयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिव नहि रम्यं मृगदृशः ॥ शृ-६ ॥

*अ: किञ्चित् मुग्धं स्मितम्, सरल-तरलः दृष्टि-विभवः, अभिनव-विलास-उक्ति-सरसः वाचाम् परिस्पन्दः, गतानाम् आरम्भः, किसलयित-लीला-परिकरः, तारुण्यं स्पृशन्त्याःमृग-दृशः किम् इव न हि रम्यम् ।*

A smile that is somewhat innocent, beauty of candidly unsteady eyes, diction in speech embellished with fresh playful words, gait in walking, abundantly sprouting elegance, what is not charming in a doe-eyed girl entering youth?

द्रष्टव्येषु किमुत्तमं मृगदृशः प्रेमप्रसन्नं मुखं
घ्रातव्येष्वपि किं तदास्यपवनः श्राव्येषु किं तद्वचः ।
किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तद्वपुः
ध्येयं किं नवयौवनं सहृदयैः सर्वत्र तद्विभ्रमः ॥ शृ-७ ॥
*अ: सहृदयैः द्रष्टव्येषु उत्तमं किम्? मृग-दृशः प्रेम-प्रसन्नं मुखम् । घ्रातव्येषु अपि (उत्तमं) किम्? तत्-आस्य-पवनः । श्राव्येषु (उत्तमं) किम्? तत्-वचः । स्वाद्येषु (उत्तमं) किम्? तत्-ओष्ठ-पल्लव-रसः । स्पृश्येषु (उत्तमं) किम् ? तत्-वपुः । सहृदयैः ध्येयं किम्? नव-यौवनम् । सर्वत्र तत्-विभ्रमः ।*
Among those a man of taste can look at, which is the best? The face of a doe-eyed lady pleasant with love; among those he can smell, which is the best? her facial breath; among those he can hear? her words; among those he can taste? the juice of her sprout- like lips; among those he can touch? her body. What is it that a man of taste should contemplate on? fresh youth. Its illusion is everywhere.

एताश्चलद्वलयसंहतिमेखलोत्थ-
झङ्कारनूपुरपराजितराजहंस्यः ।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
वित्रस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ शृ-८ ॥
*अ: एताः चलत्-वलय-संहति-मेखल-उत्थ-झङ्कार-नूपुर-पराजित-राजहंस्यः तरुण्यः वित्रस्त-मुग्ध-हरिणी-सदृशैः कटाक्षैः कस्य मनः विवशं न कुर्वन्ति?*
Whose mind do these young ladies who excel royal swans by their jingling set of bangles, girdle and the anklets not capture with their glances similar to those of frightened innocent deer?

कुङ्कुमपङ्ककलङ्कितदेहा
गौरपयोधरकम्पितहारा ।
नूपुरहंसरणत्पदपद्मा
कं न वशीकुरुते भुवि रामा ॥ शृ-९ ॥
*अ: कुङ्कुम-पङ्क-कलङ्कित-देहा गौर-पयोधर-कम्पित-हारा नूपुर-हंस-रणत्-पद-पद्मा रामा भुवि कं न वशीकुरुते ।*
Who on earth will not be captivated by a damsel who has her body smeared in kunkum, her garland swaying due to the fair breasts and her lotus- like feet jingling due to the swan-like anklets?

नूनं हि ते कविवरा विपरीतवाचो
ये नित्यमाहुरबला इति कामिनीस्ताः ।

याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोऽपि विजितास्त्वबलाः कथं ताः ॥ शृ-१० ॥
*अ: ये कामिनीः अबलाः इति नित्यम् आहुः, ते कवि-वराः विपरीत-वाचः हि नूनं । याभिः विलोलतर-तारक-दृष्टि-पातैः शक्र-आदयः अपि विजिताः ताः अबलाः कथम्?*
Those great poets who constantly tell that women are powerless indeed say perverse things. How can those who conquered even Indra through their unsteady glances be called "powerless" [abalaa]?

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्रसञ्चारसूचितेषु प्रवर्तते ॥ शृ-११ ॥
*अ: मकर-ध्वजः तस्याः सुभ्रुवः आज्ञा-करः नूनं यतः (सः) तत्-नेत्र-सञ्चार-सूचितेषु प्रवर्तते ।*
Cupid is indeed a faithful servant of women with beautiful eye-brows, because he proceeds to act based on the signals given through their rolling of eyes.

केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः ।
मुक्तानां सतताधिवासरुचिरौ वक्षोजकुम्भाविमौ
इत्थं तन्वि वपुः प्रशान्तमपि ते रागं करोत्येव नः ॥ शृ-१२ ॥
*अ: (हे) तन्वि, केशाः संयमिनः, लोचने श्रुतेः अपि पारं गते, अन्तर्-वक्त्रम् अपि स्वभाव-शुचिभिः द्विजानां गणैः कीर्णम्, इमौ वक्षोज-कुम्भौ मुक्तानां सतत-अधिवास-रुचिरौ, इत्थं ते वपुः प्रशान्तम् अपि नः रागं करोति एव ।*
Hair on the head is tied up (self-controlled); the eyes extend beyond the ears( have mastered the Vedas); the inside of the mouth is filled with naturally clean teeth ( full of Brahmins who are virtuous by nature); these two pitcher-like breasts look appealing with the continued presence of pearls ( liberated souls); thus although your body displays serenity, it disturbs us.[ The poet skilfully plays on double meaning words संयमिनः, श्रुतेः, द्विजानाम्, मुक्तानाम् and brings out an apparent contradiction.]

मुग्धे धानुष्कता केयमपूर्वा त्वयि दृश्यते ।
यया विध्यसि चेतांसि गुणैरेव न सायकैः ॥ शृ-१३ ॥
अ: मुग्धे! त्वयि (या) अपूर्वा धानुष्कता दृश्यते (सा) इयं का, यया चेतांसि गुणैरेव विध्यसि, न सायकैः?
Dear young lady, what a skill you have in archery never seen earlier in that you could pierce minds (of men) with (your) qualities (strings) only and not with arrows.[ The poet plays on word 'guna' which means quality and also string. While a normal archer shoots arrows to hit a target, you use 'guna' to hit your target, namely minds of men. ]

सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु ।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ शृ-१४ ॥

अ: प्रदीपे सति, अग्नौ सति, तारा-मणि-इन्दुषु सत्सु मे मृगशावाक्ष्या विना इदं जगत् तमोभूतम् ।
This world is all darkness without my doe-eyed lady no matter whether there is a light, a fire, stars, gems and the moon.

उद्वृत्तस्तनभार एष तरले नेत्रे चले भ्रूलते
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावलिः केन वा ॥ शृ-१५ ॥
अ: एषः उद्-वृत्त- स्तन-भारः, तरले नेत्रे, चले भ्रू-लते, इदं राग-अधिष्ठितम् ओष्ठ-पल्लवम् व्यथां कुर्वन्तु नाम; स्वयं पुष्प-आयुधेन सौभाग्य-अक्षर-मालिका इव लिखिता रोम-आवलिः मध्य-स्था अपि केन (कारणेन) अधिकं तापं करोति?
Let this weight of upturned breasts, wavering eyes, unsteady creeper-like eye-brows, this reddened sprout-like lip, trouble us; Why does this line of hair in the middle (indifferent), which looks as if it has been scripted by cupid as the alphabet string of loveliness, create affliction (in us)? [The poet plays on the word ‘madhyastha’ which can mean ‘situated in the middle’ or ‘indifferent’. He thus brings out an apparent contradiction in that something which is indifferent causes us pain. Such description may appear risqué for modern sensibilities, but is not uncommon in Sanskrit literature.]

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
कराभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ शृ-१६ ॥
*अ: सा चन्द्रकान्तेन मुखेन महा-नीलैः शिरोरुहैः, पद्मरागाभ्यां कराभ्यां, रत्न-मयी इव रेजे ।*
With her face as lovely as moon (like moon-stone), her hair deep black (like sapphire), her palms having the colour of lotus (like ruby) she was resplendent as if she was made of precious stones. ( The poet has played on the double meanings of ‘chandrakanta’,’mahanila’ and ‘padmaraga’)

गुरुणा स्तनभारेण मुखचन्द्रेन भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ शृ-१७ ॥
*अ: गुरुणा स्तन-भारेण भास्वता मुख-चन्द्रेन शनैः-चराभ्यां पादाभ्यां सा ग्रहमयी इव रेजे ।*
With the heavy weight of her breasts, her face luminous like moon and her slow pace she looked resplendent as if she was made of planets. (Again pun on words ‘guru’,’chandra’ and ‘Sanaiscara’ is skilfully employed by the poet.)

तस्याः स्तनौ यदि घनौ जघनं च हारि
वक्त्रं च चारु तव चित्त किमाकुलस्त्वम् ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ शृ-१८ ॥

*अ: (हे) चित्त, तस्याः स्तनौ यदि घनौ, जघनं च हारि, वक्त्रं च चारु तव किम्? त्वं किम् आकुलः? तेषु तव वाञ्छा अस्ति चेत् पुण्यं कुरुष्व, पुण्यैः विना समीहित-अर्थाः न भवन्ति हि |*

Dear mind, if her breasts are heavy, her hips are attractive and her face beautiful what is it for you? Why do you feel disturbed? If you desire them do good deeds. Desired objectives do not materialise without previous good deeds.

इमे तारुण्यश्रीनवपरिमलाः प्रौढसुरत-
प्रतापप्रारम्भाः स्मरविजयदानप्रतिभुवः ।
चिरं चेतश्चोरा अभिनवविकारैकगुरवो
विलासव्यापाराः किमपि विजयन्ते मृगदृशाम् ॥ शृ-१९ ॥

*अ: इमे मृगदृशां तारुण्य-श्री-नव-परिमलाः प्रौढ-सुरत-प्रताप-प्रारम्भाः स्मर-विजय-दान-प्रतिभुवः चिरं चेतःचोराः अभिनव-विकार-एक-गुरवः विलास-व्यापाराः किमपि विजयन्ते ।*

These playful activities of doe-eyed girls which are the fragrances of youthful lustre, the beginnings of adult sexual valour, which act as surety for giving victory to cupid, which steal the minds for long, and which are laden with novel alterations flourish in an un-definable manner.

प्रणयमधुरा प्रेमोदारा रसाश्रयतां गताः
फणितिमधुरा मुग्धप्रायाः प्रकाशितसम्मदाः ।
प्रकृतिसुभगा विस्रम्भार्द्राः स्मरोदयदायिनो
रहसि किमपि स्वैरालापा हरन्ति मृगीदृशाम् ॥ शृ-२० ॥

*अ: मृगीदृशां रहसि स्वैर-आलापाः प्रणय-मधुराः प्रेम-उदाराः रस-आश्रयतां गताः, फणिति-मधुराः मुग्ध-प्रायाः प्रकाशित-सम्मदाः प्रकृति-सुभगाः विस्रम्भ-आर्द्राः स्मर-उदय-दायिनः किम् अपि हरन्ति ।*

The private care-free utterances of doe-eyed girls sweet with affection, generously loving and replete with the sentiment of love, sweet to hear, well-nigh innocent, expressing exhilaration, lovely by nature, soft with feelings of love and arousing desire in others are attractive in an inexpressible way.

## सम्भोगवर्णनम्

(Description of successful love)

विश्रम्य विश्रम्य वनद्रुमाणां
छायासु तन्वी विचचार काचित् ।
स्तनोत्तरीयेन करोद्धतेन
निवारयन्ती शशिनो मयूखान् ॥ शृ-२१ ॥

*अ: काचित् तन्वी कर-उद्धतेन स्तन-उत्तरीयेन शशिनः मयूखान् निवारयन्ती वनद्रुमाणां छायासु विश्रम्य विश्रम्य विचचार ।*
A slender lady walked in the shades of forest trees resting frequently while warding off the rays of the moon by raising in hand the bosom-covering garment.

अदर्शने दर्शनमात्रकामा
दृष्ट्वा परिष्वङ्गसुखैकलोला ।
आलिङ्गितायां पुनरायताक्ष्या-
माशास्महे विग्रहयोरभेदम् ॥ शृ-२२ ॥
*अ: (वयं) अदर्शने दर्शन-मात्र-कामाः, दृष्ट्वा परिष्वङ्ग-सुख-एक-लोलाः, पुनः आयताक्ष्याम् आलिङ्गितायाम् विग्रहयोः अभेदम् आशास्महे ।*
When the wide-eyed lady is not seen we desire to see her, having seen we desire to embrace her, after embracing we seek  the union of the bodies.

मालती शिरसि जृम्भणं मुखे
चन्दनं वपुषि कुङ्कुमाविलम् ।
वक्षसि प्रियतमा मदालसा
स्वर्ग एष परिशिष्ट आगमः ॥ शृ-२३ ॥
*अ: शिरसि मालती, मुखे जृम्भणम्, वपुषि कुङ्कुम-आविलं चन्दनम्, बक्षसि मद-आलसा प्रियतमा, एषः स्वर्गः, परिशिष्टः आगमः ।*
Jasmine for the hair, a yawn on the face, body smeared with sandal paste full of saffron, a languorous passionate dear lady to hug and that is heaven rest is just (bookish) knowledge.

प्राङ्मा मेति मनागनागतरसं जाताभिलाषं ततः
सव्रीडं तदनु श्लथोद्यममथ प्रध्वस्तधैर्यं पुनः ।
प्रेमार्द्रम् स्पृहणीयनिर्भररहःक्रीडाप्रगल्भं ततो
निःसङ्गाङ्गविकर्षणाधिकसुखं रम्यं कुलस्त्री रतम् ॥ शृ-२४ ॥
*अ: कुलस्त्री-रतं प्राक् अनागत-रसं मनाक् मा मा इति, ततः जात-अभिलाषं स-व्रीडं तदनु श्लथ-उद्यमं पुनः प्रध्वस्त-धैर्यं, ततः प्रेम-आर्द्रं स्पृहणीय-निर्भर-रहः-क्रीडा-प्रगल्भम् निःसङ्ग-अङ्ग-विकर्षण-अधिकसुखं रम्यम् ।*
Saying “no,no” weakly when the desire is not yet risen, then becoming desirous shyly and with weak physical resistance and with loss of courage (to resist) and then enjoying secret carefree mature dalliances and unobstructed bodily searches render sex with ones chaste woman a great pleasure.

उरसि निपतितानां स्रस्तधम्मिल्लकानां
मुकुलितनयनानां किञ्चिदुन्मीलितानाम् ।
उपरिसुरतखेदस्विन्नगण्डस्थलानाम्

अधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ शृ-२५ ॥
*अ: भाग्यवन्तः उरसि निपतितानां, स्रस्त-धम्मिल्लकानां, मुकुलित-नयनानां, किञ्चित् उन्मीलितानां, उपरि-सुरत-खेद-स्विन्न-गण्डस्थलानाम् वधूनां अधर-मधु पिबन्ति ।*
The fortunate drink the sweet lips of their young wives who have fallen on their chests with their braided hair slipping away, with their eyes closed like a bud but ever slightly opened and with their temples wet with sweat due to the exhausting reverse amorous pleasures.

आमीलितनयनानाम् यः सुरतरसोऽनु संविदं भाति ।
मिथुनैर्मिथोऽवधारितमवितथमेव कामनिर्वहणम् ॥ शृ-२६ ॥
*अ: आमीलित-नयनानां यः अनु संविदं भाति (सः) सुरतरसः; मिथुनैः मिथः अवधारितं काम-निर्वहणं अवितथम् एव ।*
Sexual pleasure is that which flows between consenting couple with their eyes slightly closed. A sexual encounter mutually agreed to will indeed be not futile.

इदमनुचितमक्रमश्च पुंसां
यदिह जरास्वपि मान्मथा विकाराः ।
तदपि च न कृतं नितम्बिनीनां
स्तनपतनावधि जीवितं रतं वा ॥ शृ-२७ ॥
*अ: पुंसां जरासु अपि मान्मथाः विकाराः इति यत्, तत् इदं अनुचितम् अक्रमः च। नितम्बिनीनां स्तन-पतन-अवधि जीवितं रतं वा न कृतं इति यत् तत् अपि (अनुचितम्) ।*
It is indeed improper and not in order that men have sexual cravings even in old age. Similarly it is not right that women’s longevity or desire for sex is not restricted to the age when breasts sag.

A friend addresses a king:
राजंस्तृष्णाम्बुराशेर्न हि जगति गतः कश्चिदेवावसानं
कोवार्थोऽर्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे ।
गच्छामः सद्म तावद्विकसितकुमुदेन्दीवरालोकिनीनाम्
आक्रम्याक्रम्य रूपं झटिति न जरया लुप्यते प्रेयसीनाम् ॥ शृ-२८ ॥
*अ: राजन्! जगति कश्चित् एव तृष्णा-अम्बु-राशेः अवसानं न गतः हि । स्व-वपुषि स-अनुरागे यौवने गलिते, प्रभूतैः अर्थैः कः वा अर्थः? (यावत्) जरया आक्रम्य आक्रम्य रूपं न लुप्यते तावत् विकसित-कुमुद-इन्दीवर-आलोकिनीनां प्रेयसीनां सद्म गच्छामः ।*
O king! No one in this world has seen the end of the ocean of desire; what is the meaning of plenty of money when one has lost lovely youth? Well before our forms are lost due to the onslaught of old age, let us go to the residence of our beloved girls who look like blossoming red and blue lotuses.

रागस्यागारमेकं नरकशतमहादुःखसंप्राप्तिहेतुः

मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ।
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं
लोकेऽस्मिन्न ह्यनर्थव्रजकुलभवनं यौवनादन्यदस्ति ॥ शृ-२९ ॥
*अ: अस्मिन् लोके यौवनात् अन्यत्, रागस्य एकम् आगारं, नरक-शत-महा-दुःख-संप्राप्ति हेतुः, मोहस्य उत्पत्ति-बीजं, ज्ञान-तारा-अधिपस्य जलधर-पटलं, कन्दर्पस्य एक-मित्रं प्रकटित-विविध-स्पष्ट-दोष-प्रबन्धं, अनर्थ-व्रज-कुल-भवनं न अस्ति ।*
There is nothing in this world other than youth which acts as the residence of passion, which is the cause of severe grief equivalent to hundreds of hell, which acts as the seed for mental delusion, which acts as a spread of clouds to moon-like knowledge, which is the sole friend of cupid and which is a continuous series of well known various clear defects and which acts as a community hall for all worthless things.

शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरवाङ्मुक्ताफलोदन्वति ।
तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोऽपि न विक्रियां कलयते प्राप्ते नवे यौवने ॥ शृ-३० ॥
*अ: कः अपि धन्यः नवे यौवने प्राप्ते, शृङ्गार-द्रुम-नीरदे प्रसृमर-क्रीडा-रस-स्रोतसि प्रद्युम्न-प्रिय-बान्धवे चतुर-वाक्-मुक्ताफल-उदन्वति सौभाग्य-लक्ष्मी-निधौ तन्वी-नेत्र-चकोर-पार्वण-विधौ विक्रियां न कलयते ।*
He is indeed a rare fortunate person who does not get disturbed at the arrival of youth which acts as rain bearing cloud to the tree of romance, which is a quick moving stream of playfulness, which is a dear relative to Manmatha, which is an ocean for pearl-like witty sayings, which acts as full moon to the chakora-like eyes of slender ladies and which is a treasury of the goddess of prosperity.

संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलङ्क-
व्यासङ्गव्यस्तधैर्यं कथममलधियो मानसं संविदध्युः ।
यद्येताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभाजस्तरुण्यः ॥ शृ-३१ ॥
*अ: यदि एताः प्र-उद्यत्-इन्दु-द्युति-निचय-भृतः अम्भोज-नेत्राः प्रेङ्खत्-काञ्ची-कलापाः स्तन-भर-विनमत्-मध्य-भाजः तरुण्यः न स्युः, अमल-धियः अस्मिन् असारे संसारे कु-नृपति-भवन-द्वार-सेवा-कलङ्क-व्यासङ्ग-व्यस्त-धैर्यं मानसं कथं संविदध्युः?*
In this worthless worldly life, why would persons of pure mind lose their fortitude by waiting at the doors of vile kings had there been no young women with waists bent due to the weight of their breasts, with swinging gold girdles, with lotus-like eyes and who have the lustre of a rising moon? [ Even good persons have to undergo tribulations of serving lowly people for the sake of earning the favour of beautiful women.]

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुग्णद्रुमे

गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि ।
कः कुर्वीत शिरः प्रणाममलिनं म्लानं मनस्वी जनो
यद्वित्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥ शृ-३२ ॥
*अ: सिद्ध-अध्यासित-कन्दरे हर-वृष-स्कन्ध-अवरुग्ण-द्रुमे गङ्गा-धौत-शिलातले हिमवतः स्थाने श्रेयसि स्थिते, यत् स्मर-अस्त्रं वित्रस्त-कुरङ्ग-शाव-नयनाः स्त्रियः न स्युः (यदि), कः मनस्वी जनः शिरः म्लानं प्रणाम-मलिनं कुर्वीत?*
When there are propitious Himalayan abodes in the caves inhabited by realized souls where trees are damaged by the back of Siva's bull and where rocks are washed by river Ganga who would make their heads withered and dirtied by (frequent) bowing down (to the wealthy)?

संसार तवपर्यस्तपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युः यदि ते मदिरेक्षणाः ॥ शृ-३३ ॥
*अ: संसार! तव पर्यस्त-पदवी न दवीयसी (स्यात्) यदि ते अन्तरा दुस्तराः मदिरेक्षणाः न स्युः ।*
O worldly life! Your far end would not be distant if only there were no women with intoxicated eyes in between who are difficult to cross over.

दिश वनहरिणेभ्यो वंशकाण्डच्छवीनां
कवलमुपलकोटिच्छिन्नमूलं कुशानाम् ।
शकयुवतिकपोलापाण्डुताम्बूलवल्ली-
दलमरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ शृ-३४ ॥
*अ: वंश-काण्ड-छवीनां कुशानां उपल-कोटि-छिन्न-मूलं वन-हरिणेभ्यः दिश, वा अरुण-नख-अग्रैः पाटितं शक-युवति-कपोल-आपाण्डु-ताम्बूल-वल्ली-दलं वधूभ्यः दिश ।*
Either provide to forest deer roots having the colour of bamboo stems cut by the sharp edges of a stone or provide to (your) young wives betel leaves which are slightly whitish like the cheeks of Shaka women and which have been cut by red tips of nails. [ Either lead the life of a hermit or be a house holder. Shakas refer to a foreign race who conquered parts of India and established kingdoms.]

असाराः सर्वे ते विरतिविरसाः पापविषया
जुगुप्स्यन्तां यद्वा ननु सकलदोषास्पदमिति ।
तथाप्येतद्भूमौ न हि परहितात्पुण्यमधिकं
न चास्मिन्संसारे कुवलयदृशो रम्यमपरम् ॥ शृ-३५ ॥
*अ: सर्वे ते पाप-विषयाः विरति-विरसाः इति वा सकल-दोष-आस्पदम् इति वा जुगुप्स्यन्ताम् । तथा अपि एतत्-भूमौ पर-हितात् अधिकं पुण्यं नहि । अस्मिन् संसारे कुवलय-दृशः रम्यम् अपरं न ।*
You may feel a sense of disgust saying that all things end up being tasteless or they harbour all sorts of faults. Yet in this world there is nothing more pious than doing good to others and there is nothing more pleasant than blue-lotus-eyed ladies.

मात्सर्यमुत्सार्य विचार्य कार्य-
मार्याः समर्यादमिदं वदन्तु ।
सेव्या नितम्बाः किमु भूधराणाम्
उत स्मरस्मेरविलासिनीनाम् ॥ शृ-३६ ॥
*अ: आर्याः मात्सर्यम् उत्सार्य कार्यं विचार्य समर्यादम् इदं वदन्तु, "भूधराणां नितम्बाः किमु सेव्याः, उत स्मर-स्मेर-विलासिनीनां (नितम्बाः)?"*
Gentlemen! Casting off jealousy and after deliberation please tell, " Is it better to go behind kings serving them or go behind coquettish ladies with captivating smiles?"

संसारे स्वप्नसारे परिणतितरले द्वे गती पण्डितानां
तत्त्वज्ञानामृताम्भःप्लवललितधियां यातु कालः कथञ्चित् ।
नो चेन्मुग्धाङ्गनानां स्तनघनजघनाभोगसंभोगिनीनां
स्थूलोफस्थस्थलीषु स्थगितकरतलस्पर्शलीलोद्यमानाम् ॥ शृ-३७ ॥
*अ: स्वप्न-सारे परिणति-तरले संसारे द्वे गती, तत्त्व-ज्ञान-अमृत-अम्भः-प्लव-ललित-धियां पण्डितानां कालः कथञ्चित् यातु, नो चेत् स्तन-घन-जघन-आभोग-संभोगिनीनां स्थूल-उपस्थ-स्थलीषु स्थगित-करतल-स्पर्श-लीला-उद्यमानां (कालः यातु) ।*
There are two ways in this dream-like worldly life which ends up being unsteady: One is that of the scholars whose boat-like mind is floating on the ocean of ambrosia of true knowledge and the other is of those who are busy with ladies of heavy breasts and buttocks and whose hands are being restrained from playing in the fat private areas.

आवासः क्रियतां गाङ्गे पापहारिणि वारिणि ।
स्तनद्वये तरुण्या वा मनोहारिणि हारिणि ॥ शृ-३८ ॥
*अ: आवासः पाप-हारिणि गाङ्गे वारिणि क्रियताम्, वा तरुण्याः मनोहारिणि हारिणि स्तन-द्वये (क्रियताम्)।*
Let a dwelling be made on the banks of Ganga which destroys sins or on the beautiful garlanded breasts of a young lady.

किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापैः
द्वयमिह पुरुषाणां सर्वदा सेवनीयम् ।
अभिनवमदलीलालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ शृ-३९ ॥
*अ: इह बहुभिः युक्ति-शून्यैः प्रलापैः उक्तैः किम्? इह पुरुषाणां द्वयं सर्वदा सेवनीयम्, सुन्दरीणां अभिनव-मद-लीला-लालसं स्तन-भर-परिखिन्नं यौवनं वा वनम् वा ।*
What is the use of any number of sense-less talks? Here in this world there are two things for men worth serving: Either the forest or the youth of beautiful ladies who are fatigued by the weight of their breasts and who ardently look forward to the novel pleasures of youthful plays.

सत्यं जना वच्मि न पक्षपाता-
ल्लोकेषु सप्तस्वपि तथ्यमेतत् ।
नान्यन्मनोहारि नितम्बिनीभ्यो
दुःखैकहेतुः न च कश्चिदन्यः ॥ शृ-४० ॥
*अ: (हे) जनाः! सत्यं वच्मि, न पक्षपातात्, एतत् सप्तसु लोकेषु अपि तथ्यम् । नितम्बिनीभ्यः मनोहारि अन्यत् न (अस्ति), दुःख-एक-हेतुः कश्चित् अन्यः न च (अस्ति)*
O people! I am telling the truth and without any bias. This is true in all the seven worlds. There is nothing as captivating as beautiful women and nothing else that causes grief.

## कामिनीगर्हणम्

( Censuring women)

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नमत्-
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि
प्रत्यक्षाशुचिभस्त्रिकां स्त्रियमहो मोहस्य दुष्चेष्टितम् ॥ शृ-४१ ॥
*अ: विद्वान् अपि कान्ता इति उत्पल-लोचना इति विपुल-श्रोणी-भरा इति उन्नमत्-पीन-उत्तुङ्ग-पयोधरा इति सुमुख-अम्भोजा इति सुभ्रूः इति, प्रत्यक्ष-अशुचि-भस्त्रिकां स्त्रियम् दृष्ट्वा माद्यति,मोदते, अभिरमते, प्रस्तौति । अहो! मोहस्य दुः-चेष्टितम् ।*
Looking at a woman who is nothing more than a dirty bellows, even a learned person gets enchanted, feels pleased, enjoys and praises her saying my dearest, you have eyes like blue lotuses, you have heavy hips, you have raised heavy breasts, your face is like a lotus and you have beautiful eye brows. Oh! How wicked is delusion!

स्मृता भवति तापाय दृष्टा चोन्मादकारिणी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥ शृ-४२ ॥
*अ: सा स्मृता तापाय भवति, दृष्टा उन्माद-कारिणी च, स्पृष्टा मोहाय भवति, कथं दयिता भवति नाम ?*
When remembered she causes sorrow; when seen she intoxicates; when touched causes delusion. How can she be the beloved?

तावदेवामृतमयी यावल्लोचनगोचरा ।
चक्षुःपथादतीता तु विषादप्यतिरिच्यते ॥ शृ-४३ ॥
*अ: (इयं) यावत् लोचन-गोचरा तावत् एव अमृतमयी । चक्षुः पथात् अतीता तु विषात् अपि अतिरिच्यते ।*
So long as she is in sight she is full of ambrosia; once she is out of sight she is worse than poison.

नामृतं न विषं किञ्चिदेतां मुक्त्वा नितम्बिनीम् ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ शृ-४४ ॥
*अ: एतां नितम्बिनीं मुक्त्वा अमृतं न किञ्चित्, विषं न किञ्चित्, रक्ता (यदि) सा एव अमृत-लता विरक्ता यदि सा एव विष-वल्लरी ।*
There is nothing like ambrosia or poison other than this graceful lady; if she is attached she is a creeper of ambrosia, if she is ill-disposed she is a poisonous vine.

आवर्तः संशयानामविनयभुवनं पट्टणं साहसानाम्
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ।
स्वर्गद्वारस्य विघ्नः नरकपुरमुखं सर्वमायाकरण्डम्
स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाशः ॥ शृ-४५ ॥
*अ: संशयानाम् आवर्तः, अविनय-भुवनम्, साहसानां पट्टणम्, दोषाणां सन्निधानम्, अप्रत्ययानां कपट-शत-मयं क्षेत्रम्, स्वर्ग-द्वारस्य विघ्नः, नरक-पुर-मुखम्, सर्व-माया-करण्डम्, प्राणि-लोकस्य पाशः अमृतमयं विषम्, स्त्री-यन्त्रं केन सृष्टम्?*
Who created this machine called woman, who is a whirl pool of doubts, a world of bad manners, a city of rashness, a source of follies, a field of several forms of untrustworthiness, an impediment to the door of heaven, the gateway to the city of hell, a bunch of all delusions, a snare for all beings, a poison looking like ambrosia?

नो सत्येन मृगाङ्क एष वदनीभूतो न चेन्दीवर-
द्वन्द्वं लोचनतां गतं न कनकैरप्यङ्गयष्टिः कृता ।
किं त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वङ्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥ शृ-४६ ॥
*अ: एषः मृगाङ्कः सत्येन नो वदनीभूतः, इन्दीवरद्वन्द्वम् लोचनताम् न गतं, अङ्ग-यष्टिः कनकैः अपि न कृता, किं तु एवं कविभिः प्रतारित-मनाः मन्दः जनः तत्त्वं विजानन् अपि मृग-दृशां त्वक्-मांस-अस्थि-मयं वपुः सेवते ।*
In truth this moon is far from being the face, a pair of lotuses does not match eyes, the lean body is not made of Gold. But fools misled by poets seek doe-eyed women's body made of skin, flesh and bones.

लीलावतीनां सहजा विलासाः
त एव मूढस्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्धः
तत्र भ्रमत्येव वृथा षडङ्घ्रिः ॥ शृ-४७ ॥
*अ: लीलावतीनां ते एव सहजाः विलासाः मूढस्य हृदि स्फुरन्ति । नलिन्याः रागः निसर्ग-सिद्धः हि, षडङ्घ्रिः तत्र वृथा भ्रमति एव ।*
The same old natural coquetry of playful ladies creates scintillations in fool's mind; the redness of a lotus is natural but bumble bee wanders around it in vain.

यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृति परं
मुखाब्जं तन्वङ्ग्याः किल वसति यत्राधरमधु ।
इदं तत्किंपाकद्रुमफलमिदानीमतिरसं
व्यतीतेऽस्मिन् काले विषमिव भविष्यत्यसुखदम् ॥ शृ-४८ ॥
*अ: तनु-अङ्ग्याः एतत् पूर्ण-इन्दु-द्युति-हरं परम् उदार-आकृति मुख-अब्जं यत्र अधर-मधु वर्तते (इति) यत् तत् इदं किंपाक-द्रुम-फलं इदानीम् अतिरसं अस्मिन् काले व्यतीते विषम् इव अ-सुखदं भविष्यति ।*
This lotus-like face with best form which steals the lustre of full moon and where the honey of lips dwells will become poisonous as time passes just as the very sweet fruit of kimpaaka tree will turn poisonous in course of time.

उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तन-
द्वन्द्वेनोद्गतचक्रवाकयुगला वक्त्राम्बुजोद्भासिनी ।
कान्ताकारधरा नदीयमभितः क्रूरात्र नापेक्षते
संसारार्णवमज्जनं यदि तदा दूरेण सन्त्यज्यताम् ॥ शृ-४९ ॥
*अ: उन्मीलत्-त्रि-वली-तरङ्ग-निलया प्रोत्तुङ्ग-पीन-स्तन-द्वन्द्वेन उद्गत-चक्रवाक-युगला वक्त्र-अम्बुज-उद्भासिनी कान्ता-आकार-धरा इयं नदी अभितः क्रूरा । संसार-अर्णव-मज्जनं यदि न अपेक्षते तदा दूरेण सन्त्यज्यताम् ।*
This river in the form of your beloved with waves in the form of three abdominal folds opened up and a pair of chakravaka birds in the form of raised plump breasts and looking lustrous with a lotus in the form of face is all round dangerous. If you do not want to dip into the ocean of worldly life, keep off from it.

जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥ शृ-५० ॥
*अ: अन्येन सार्धं जल्पन्ति, स-विभ्रमाः अन्यं पश्यन्ति, हृद्-गतम् अन्यं चिन्तयन्ति । योषितां कः नाम प्रियः ?*
Who indeed is a beloved for women? They converse with one, they look at another one coquettishly, and think of another in their heart.

अपसर सखे दूरादस्मात्कटाक्षविषानलात्
प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः ।
इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधैः
चतुरवनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः ॥ शृ-५१ ॥
*अ: सखे! अस्मात् कटाक्ष-विष-अनलात् प्रकृति-विषमात् विलास-फणा-भृतः योषित्-सर्पात् दूरात् अपसर । इतर-फणिना दष्टः औषधैः चिकित्सितुं शक्यः । मन्त्रिणः चतुर-वनिता-भोगि-ग्रस्तं त्यजन्ति हि ।*

Dear friend! Move away from this serpent called woman with poisonous exhalations called furtive glances and having hood in the form of playfulness and which are by nature troublesome. If you are bitten by other snakes it is possible to treat with medicines. Conjurers keep away from those attacked by snakes called clever women.

विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं बडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमर्त्य-
मत्स्यान् विकृष्य विपचत्यनुरागवह्नौ ॥ शृ-५२ ॥
अ: *मकरकेतनधीवरेण स्त्रीसंज्ञितं बडिशम् अत्र भवाम्बुराशौ विस्तारितम्, येन अचिरात् तत्-अधर-आमिष-लोल-मर्त्य-मत्स्यान् विकृष्य अनुरागवह्नौ विपचति ।*
The fisherman called Manmatha (Love God) has spread a net called woman in the ocean of worldly affairs, with the help of which he will cook in the fire of lust fishes in the form of men who are attracted to the bait in the form of woman's lips.

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।
मा सञ्चर मनःपान्थ तत्रास्ते स्मरतस्करः ॥ शृ-५३ ॥
अ: *मनःपान्थ! कुच-पर्वत-दुर्गमे कामिनी-काय-कान्तारे मा सञ्चर । तत्र स्मरतस्करः आस्ते ।*
O traveller called mind! Do not travel in the forest of woman's body having mountains which are difficult to access in the form of breasts.

व्यादीर्घेण चलेन वक्रगतिना तेजस्विना भोगिना
नीलाब्जद्युतिनाहिना परमहं दष्टो न तच्चक्षुषा ।
दृष्टः सन्ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधम् ॥ शृ-५४ ॥
अ: *अहं व्यादीर्घेण चलेन वक्र-गतिना तेजस्विना भोगिना नील-अब्ज-द्युतिना अहिना न दष्टः परं तत्-चक्षुषा दृष्टः, प्रायेण धर्मार्थिनः चिकित्सका दिशि दिशि सन्ति, मुग्ध- अक्षी-ईक्षण-वीक्षितस्य मे न हि वैद्यः न च अपि औषधम् ।*
I was looked at and not bitten by a blue-hued hooded energetic serpent which was moving in a long meandering gait; there are of course liberal doctors in all directions (to cure snake-bite); but there is neither medicine nor doctor for me who has been looked at by a guileless girl.

इह हि मधुरगीतं नृत्तमेतद्रसोऽयं
स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।
इति हतपरमार्थैरिन्द्रियैर्भ्राम्यमाणः
स्वहितकरणधूर्तैः पञ्चभिर्वञ्चितोऽस्मि ॥ शृ-५५ ॥
*अ: इह मधुर-गीतं हि, एतत् नृत्तम्, अयं रसः, असौ परिमलः स्फुरति, एषः स्तनानां स्पर्शः, इति हत-परम-अर्थैः पञ्चभिः स्व-हित-करण-धूर्तैः इन्द्रियैः भ्राम्यमाणः वञ्चितः अस्मि ।*

Here is pleasant music, here is dancing, here there is something juicy (to taste), here is fragrance rising forth, here is the touch of breasts; in this manner I have been cheated through delusion by these five scoundrels called senses skilled in furthering their own interests and who have destroyed the ultimate objective (of lfe).

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विविधैः शान्तिकशतैः ।
भ्रमावेशादङ्गे कमपि विदधद्भङ्गमसकृत्-
स्मरापस्मारोऽयं भ्रमयति दृशं घूर्णयति च ॥ शृ-५६ ॥
*अ: अयं स्मर-अपस्मारः मन्त्राणां न गम्यः, भैषज्य-विषयः न भवति, विविधैः शान्तिक-शतैः प्रध्वंसं न व्रजति च, भ्रम-आवेशात् अङ्गे कम् अपि भङ्गम् असकृत् विदधत् दृशं भ्रमयति घूर्णयति च ।*
This disease of epilepsy called cupid is not amenable to incantations, it is not a matter of medicine, it does not go away even after hundreds of appeasing rites, it distorts eye-sight and makes one feel giddy producing contortions of limbs often.

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ शृ-५७ ॥
*अ: कः जाति-अन्धाय च दुर्मुखाय च जरा-जीर्ण-अङ्गाय च, ग्रामीणाय च, गलत्-कुष्ठ-अभिभूताय च लक्ष्मी-लव-श्रद्धया मनोहरं निज-वपुः यच्छन्तीषु विवेक-कल्प-लतिका-शस्त्रीषु पण्यस्त्रीषु रज्येत?*
Who would like to indulge oneself in a prostitute who acts as a sword to the creeper of discrimination and who lends her beautiful body, just for the sake of earning some money, to a blind man, an ugly man, an old man with aged limbs, a villager and a leper?

वेश्यासौ मदनज्वाला रूपेन्धनविवर्धिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ शृ-५८ ॥
*अ: असौ वेश्या रूप-इन्धन-वर्धिता मदन-ज्वाला यत्र कामिभिः यौवनानि धनानि च हूयन्ते ।*
This prostitute is a flame of lust fed by the fuel called beauty, where youth and money are sacrificed.

कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।
चारभटचोरचेटकविटनटनिष्ठीवनशरावम् ॥ शृ-५९ ॥
*अ: कः कुल-पुरुषः चार-भट-चोर-चेटक-विट-नट-निष्ठीवन-शरावम् वेश्या-अधर-पल्लवं मनोज्ञम् अपि चुम्बति?*
Which well bred person would kiss the sprout- like lips of a prostitute which act a spittoon for spies, soldiers, thieves, slaves, paramours, actors even if they are appealing.

मधु तिष्ठति वाचि योषितां
हृदि हालाहलमेव केवलम् ।
अत एव निपीयतेऽधरो
हृदयं मुष्टिभिरेव ताड्यते ॥ शृ-६० ॥
*अ: योषितां वाचि मधु तिष्ठति, हृदि केवलं हालाहलम्, अतः एव अधरः निपीयते, हृदयं मुष्टिभिः एव ताड्यते ।*
There is honey in the words of women, but potent poison in their hearts; that is why their lips are drunk and bosoms pounded by fists.

## सुविरक्तदुर्विरक्तपद्धतिः

Section on the right and wrong ways of renunciation

धन्यास्त एव धवलायतलोचनानां
तारुण्यदर्पघनपीन पयोधराणाम् ।
क्षामोदरोपरि लसत्त्रिवलीलतानां
दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ शृ-६१ ॥
अ: धवल-आयत-लोचनानां तारुण्य-दर्प-घन-पीन-पयोधराणां क्षाम-उदर-उपरि-लसत्-त्रिवली-लतानां आकृतिं दृष्ट्वा येषां मनः न विकृतिम् एति ते एव धन्याः ।
They indeed are fortunate whose minds do not get disturbed looking at the form of ladies having white and broad eyes, whose breasts are hard and heavy in the form of arrogance of youth and whose slender waists carry the creeper- like three folds.

बाले लीलामुकुलितममी मन्थरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थ एव श्रमस्ते ।
संप्रत्यन्ये वयमुपरतं बाल्यमास्था वनान्ते
क्षीणो मोहस्तृणमिव जगज्जालमालोकयामः ॥ शृ-६२ ॥
अ: बाले, अमी मन्थरा दृष्टिपाताः किं लीलामुकुलितं क्षिप्यन्ते? विरम विरम ते श्रमःव्यर्थः एव, सम्प्रति वयम् अन्ये, बाल्यम् उपरतम्, वन-अन्ते आस्था, मोहः क्षीणः, जगत्-जालं तृणम् इव आलोकयामः ।
Young damsel! Why are these languid glances playfully half-shut being thrown at me? Please stop, your efforts are wasted, we are different now, our youth is finished, we care for forests, our desires have weakened, we look upon the web of worldly affairs like a blade of straw.

इयं बाला मां प्रत्यनवरतमिन्दीवरदल-
प्रभाचोरं चक्षुः क्षिपति किमभिप्रेतमनया ।

गतो मोहोऽस्माकं स्मरशबरबाणव्यतिकर-
ज्वरज्वाला शान्ता तदपि न वराकी विरमति ॥ शृ-६३ ॥
अ: इयं बाला मां प्रति अनवरतम् इन्दीवर-दल-प्रभा-चोरं चक्षुः क्षिपति, अनया किम् अभिप्रेतम् । अस्माकं मोहः गतः । स्मर-शबर-बाण-व्यतिकर-ज्वर-ज्वाला शान्ता, तत् अपि वराकी न विरमति ।
This damsel is all the time casting towards me her eyes which rob the lustre of lotus petals. What is her intention? Our infatuation is gone; the flames of the fever due to the provocation of the arrow of hunter called Manmatha have subsided; even then this wretched lady does not stop.

किं कन्दर्प शरं कदर्थयसि रे कोदण्डटङ्कारितं
रे रे कोकिल कोमलं कलरवं किं वा वृथा जल्पसि ।
मुग्धे स्निग्धविदग्धचारुमधुरैर्लोलैः कटाक्षैरलं
चेतश्चुम्बितचन्द्रचूडचरणध्यानामृतं वर्तते ॥ शृ-६४ ॥
*अ: रे कन्दर्प, कोदण्डटङ्कारितं शरं किं कदर्थयसि? रे रे कोकिल! कोमलं कल-रवं किं वा वृथा जल्पसि, मुग्धे! स्निग्ध-विदग्ध-चारु-मधुरैः लोलैः कटाक्षैः अलम्, चेतः! चुन्बित-चन्द्र-चूड-चरण-ध्यान-अमृतं वर्तते ।*
O Cupid! Why do you torment by twanging the bow? O cuckoo! Why do you sing your soft tunes in vain? O guileless lady! Enough of  your smooth artful elegant and sweet unsteady glances. O mind! There exists the ambrosia of meditating on Siva’s head kissed by the moon. (go and seek it)

विरहेऽपि सङ्गमः खलु परस्परं सङ्गतं मनो येषाम् ।
हृदयं विघट्टितं चेत् सङ्गो विरहं विशेषयति ॥ शृ-६५ ॥
*अ: येषां मनः परस्परं सङ्गतं विरहे अपि सङ्गमः खलु, हृदयं विघट्टितं चेत् सङ्गः विरहं विशेषयति ।*
If the minds have met there is union even while separated; if the heart is broken union enhances the feeling of separation.

किं गतेन यदि सा न जीवति
प्राणिति प्रियतमा तथापि किम् ।
इत्युदीक्ष्य नवमेघमालिकां
न प्रयाति पथिकः स्वमन्दिरम् ॥ शृ-६६ ॥
*अ: यदि प्रियतमा न जीवति गतेन किं, यदि सा प्राणिति तथा अपि किम् ?
इति नवमेघमालिकां उदीक्ष्य पथिकः स्वमन्दिरम् न प्रयाति ।*
“What is the use of my going if my beloved is not alive; what if she is alive even?” thinking thus, looking at the fresh series of clouds the traveller does not proceed towards his house.

विरमत बुधा योषित्सङ्गात्सुखात्क्षणबन्धुरात्
कुरुत करुणामैत्रीप्रज्ञावधूजनसङ्गमम् ।
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं
शरणमथ वा श्रोणीबिम्बं रणन्मणिमेखलम् ॥ शृ-६७ ॥
*अ: बुधाः, अथ क्षण-बन्धुरात् सुखात् योषित्-सङ्गात् विरमत, करुणा-मैत्री-प्रज्ञा-वधूजन-सङ्गमं कुरुत, नरके हार-आक्रान्तं घन-स्तन-मण्डलं रणन्-मणि-मेखलं श्रोणी-बिम्बं न खलु वा शरणम् ।*
Scholars! Stop being in the company of ladies which gives momentary pleasure, cultivate the company of ladies called Compassion, Friendship and Knowledge, you cannot take refuge in ladies of heavy breasts pressed by garlands and hips with jingling waist band when you land in hell.

यदा योगाभ्यासव्यसनकृशयोरात्ममनसोः
अविच्छिन्ना मैत्री स्फुरति कृतिनस्तस्य किमु तैः ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः
सनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ शृ-६८ ॥
*अ: यदा (यस्य) योग-अभ्यास-व्यसन-कृशयोः आत्म-मनसोः अविच्छिन्ना मैत्री स्फुरति, तस्य कृतिनः तैः प्रियाणाम् आलापैः वक्त्र-विधुभिः अधर-मधुभिः, स-निश्वास-आमोदैः स-कुच-कलश-आश्लेष-सुरतैः किमु?*
For those successful persons, in whom there sparkles a continuous union between the soul and the mind weakened by the practice of Yoga, of what use is chatting with loving ladies who have honey in their moon-like lips, enjoying the fragrance of their breath and having amorous pleasures of embracing pot-like breasts?

यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा दृष्टं नारीमयमिदमशेषं जगदिति ।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ शृ-६९ ॥
*अ: यदा स्मर-तिमिर-सञ्चार-जनितं अज्ञानम् आसीत् तदा इदम् अशेषं जगत् नारीमयं दृष्टम्,इदानीं पटुतर-विवेक-अञ्जन-जुषाम् अस्माकं दृष्टिः समीभूता, त्रिभुवनम् अपि ब्रह्म मनुते ।*
When there was ignorance caused by the passage of darkness called Cupid this whole world looked full of ladies; now that our vision is upright having the collyrium of discriminatory knowledge we consider all the three worlds to be Brahman.

तावदेव कृतिनामपि स्फुरत्-
येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषां
ताड्यते चटुललोचनाञ्चलैः ॥ शृ-७० ॥
*अ: कृतिनाम् अपि एषः निर्मल-विवेक-दीपकः तावत् एव स्फुरति यावत् एव कुरङ्ग-चक्षुषां चटुल-लोचन-अञ्चलैः न ताड्यते ।*

A pious person’s light of faultless ability to discriminate shines only so long as he is not struck by the side glances of unsteady eyes of doe-eyed ladies.

वचसि भवति सङ्गत्यागमुद्दिश्य वार्ता
श्रुतिमुखरमुखानां केवलं पण्डितानाम् ।
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं
कुवलय नयनानां को विहातुं समर्थः ॥ शृ-७१ ॥
*अ: श्रुति-मुखर-मुखानां पण्डितानां केवलं सङ्ग-त्यागम् उद्दिश्य वार्ता वचसि केवलं भवति । कः कुवलय-नयनानाम् अरुण-रत्न-ग्रन्थि-काञ्ची-कलापं जघनं विहातुं समर्थः?*
For scholars who are proficient in reciting the Vedas, the subject of detachment is just for talking. Who can let go the lotus-eyed ladies’ loins, the girdles of which have a red ruby at the knot?

स परप्रतारकोऽसौ निन्दति योऽलीकपण्डितो युवतीः ।
यस्मातपसोऽपि फलं स्वर्गः स्वर्गेऽपि चाप्सरसः ॥ शृ-७२ ॥
*अ: यः युवतीः निन्दति असौ सः पर-प्रतारकः अलीक-पण्डितः, यस्मात् तपसः अपि फलं स्वर्गः स्वर्गे अपि च अप्सरसः ।*
He is a false scholar who deceives others by castigating young women, because, the fruit of penance is heaven and there are divine-nymphs even in heaven.

मत्तेभकुम्भदलने भुवि सन्ति धीराः
केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ।
किं तु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥ शृ-७३ ॥
*अ: भुवि मत्त-इभ-कुम्भ-दलने धीराः सन्ति, केचित् प्रचण्ड-मृगराज-वधे अपि दक्षाः, किं तु बलिनां पुरतः प्रसह्य ब्रवीमि, मनुष्याः कन्दर्प-दर्प-दलने विरलाः ।*
There are brave people in this world who can strike at the temple of a mad elephant; there are capable people who can kill a lion, king of animals; but, I can tell in front of strong people, people who can strike at the arrogance of cupid are indeed rare.

सन्मार्गे तावदास्ते प्रभवति च नरस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां हृदि न धृतिमुषो दृष्टिबाणाः पतन्ति ॥ शृ-७४ ॥
*अ: यावत् लीलावतीनां एते भ्रू-चाप-आकृष्ट-मुक्ताः श्रवण-पथ-गताः नील-पक्ष्माणः धृति-मुषः दृष्टि-बाणाः हृदि न पतन्ति, तावत् एव नरः सन्मार्गे आस्ते, इन्द्रियाणां (नियमने) तावत् एव प्रभवति, तावत् लज्जां विधत्ते, तावत् एव विनयम् अपि समालम्बते ।*

So long as the arrows of glances of coquettish ladies shot by the curved bow-like brows with blue eye lashes (blue feathers) which steal ones courage do not fall on his heart, he treads the right path, he controls the senses, he upholds a sense of shame and he displays modesty.

उन्मत्तप्रेमसंरम्भादारभन्ते यदङ्गनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ शृ-७५ ॥
*अ: अङ्गनाः उन्मत्त-प्रेम-संरम्भात् यत् आरभन्ते तत्र प्रत्यूहम् आधतुं ब्रह्मा अपि कातरः ।*
Even Brahma feels diffident to obstruct actions of women who are insanely excited by love.

तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥ शृ-७६ ॥
*अ: यावत् अङ्गेषु हतः पञ्चेषु-पावकः न ज्वलति, तावत् महत्त्वं पाण्डित्यं कुलीनत्वं, विवेकिता ।*
One’s greatness, scholarship and ability to discriminate last so long as the cursed fire called cupid does not inflame one’s body.

शास्त्रज्ञोऽपि प्रगुणितनयोऽप्यात्तबोधोऽपि बाढं
संसारेऽस्मिन् भवति विरलो भाजनं सद्गतीनाम् ।
येनैतस्मिन्निरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भवति कुटिला भ्रूलता कुञ्चिकेव ॥ शृ-७७ ॥
*अ: अस्मिन् संसारे शास्त्रज्ञः अपि, प्रगुणित-नयः अपि, आत्त-बोधः अपि,सद्गतीनां भाजनं विरलः भवति, येन एतस्मिन् वाम-अक्षीणां कुटिला भ्रू-लता कुञ्चिका इव निरय-नगर-द्वारम् उद्घाटयन्ती भवति ।*
In this world even though a person is well versed in scriptures, is endowed with right conduct, is aware of true knowledge it is rare that he attains salvation. Because the curved creeper-like eye brows of ladies with beautiful eyes act as a key which opens the door of city called hell.

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयत्क्लिन्नः कृमिकुलशतैरावृततनुः ।
क्षुधाक्षामो जीर्णः पिठरककसालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः ॥ शृ-७८ ॥
*अ: कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलःव्रणी पूयत्क्लिन्नः कृमि-कुल-शतैः आवृत-तनुः क्षुधा-क्षामः जीर्णः पिठरक-कसाल-अर्पित-गलः श्वा शुनीम् अन्वेति । मदनः हतम् अपि च हन्ति एव ।*
A dog even if it is weak, blind, lame, deaf, tail-less, wounded wet with pus, with its body covered with hundreds of worms, hungry, old with its neck stuck in a broken pot follows a bitch. Cupid strikes even the stricken.

स्त्रीमुद्रां कुसुमायुधस्य जयिनीं सर्वार्थसम्पत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकश्चापरे ॥ शृ-७९ ॥
अ: *ये मूढाः कुधियः कुसुम-आयुधस्य जयिनीं सर्व-अर्थ-सम्पत्करीं स्त्री-मुद्रां प्रविहाय मिथ्या-फल-अन्वेषिणः यान्ति,ते तेन एव निहत्य निर्दयतरं नग्नीकृताः मुण्डिताः केचित् पञ्चशिखीकृताः च जटिलाः अपरे कापालिकाः च (कृताः) ।*
Fools having wrong knowledge who neglect the cupid’s signet in the form of ladies which provides every type of wealth and which ensures victory go after false results. They are mercilessly destroyed by the same cupid and some are made naked, tonsured, some are made to have five tufts, some to have matted hairs and others to hold skulls. [ It is the poet’s way of saying that they become ascetics of various types.]

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनाः
तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं येभुञ्झते मानवाः
तेषामिन्द्रियनिग्रहो यदि भवेत् विन्ध्यः प्लवेत् सागरे ॥ श्रृ-८० ॥
अ: *वात–अम्बु-पर्ण-अशनाः विश्वामित्र-पराशर-प्रभृतयः ते अपि सुललितं स्त्री-मुख-पङ्कजं दृष्ट्वा एव मोहं गताः । शाली-अन्नं सघृतं पयो-दधि-युतं ये मानवाः भुञ्जते तेषाम् इन्द्रियनिग्रहः यदि भवेत् विन्ध्यः सागरे प्लवेत् ।*
Even ascetics like Viswamitra and Parasara who subsisted on just air, water or leaves got deluded by looking at the lotus face of ladies. Vindhya mountain would float on ocean if those who consume cooked rice with ghee mixed with milk and curd were to control their senses.

ऋतुवर्णनम्

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयो
मधुरविधुरोत्कण्ठाभाजः प्रियाः पिकपक्षिणाम् ।
विरलविरलस्वेदोद्गारा वधूवदनेन्दवः
प्रसरति मधौ धात्र्यां जातो न कस्य गुणोदयः ॥ शृ-८१ ॥
अ: *परिमल-भृतः वाताः, नवाङ्कुरकोटयः शाखाः, पिकपक्षिणां प्रियाः मधुर-विधुर-उत्कण्ठाभाजः, वधू-वदन-इन्दवः विरल-विरल-स्वेद-उद्गाराः, धात्र्यां मधौ प्रसरति (सति) कस्य गुणोदयः न जातः ।*
The wind is carrying fragrances, the branches are full of the tips of new sprouts, female cuckoos express a longing sometimes pleasing and sometimes harsh, the moon-like faces of young ladies have sparse drops of sweats oozing; when spring arrives on the land which thing does not  attain quality?

मधुरयं मधुरैरपि कोकिला-
कलरवैर्मलयस्य च वायुभिः ।
विरहिणः प्रहिणस्ति शरीरिणो
विपदि हन्त सुधापि विषायते ॥ शृ-८२ ॥

*अ: अयं मधुः मधुरैः कोकिला-कल-रवैः मलयस्य वायुभिः अपि विरहिणः शरीरिणः प्रहिणस्ति । विपदि सुधा अपि विषायते, हन्त ।*

This spring time hits the separated lovers with the pleasant indistinct singings of the cuckoo and the wind blowing from Malaya mountain. Alas! Even ambrosia turns poison in times of distress.

आवासः किलकिञ्चितस्य दयिताः पार्श्वे विलासालसाः
कर्णे कोकिलकामिनीकलरवः स्मेरो लतामण्डपः ।
गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सितांशोः कराः
केषाञ्चित्सुखयन्ति चात्र हृदयं चैत्रे विचित्राः स्रजः ॥ शृ-८३ ॥

*अ: अत्र चैत्रे किलकिञ्चितस्य आवासः, पार्श्वे विलास-अलसाः दयिताः, कर्णे कोकिल-कामिनी-कल-रवः स्मेरः लता-मण्डपः, कतिपयैः सत्-कविभिः समं गोष्ठी, सितांशोः मुग्धाः कराः, विचित्राः स्रजः केषाञ्चित् हृदयं सुखयन्ति ।*

Amorous display of emotions at home, beloveds tired of amorous activities by the side, the sweet tones of the female cuckoo to hear, vine- bower  full of laughter, meeting with a few reputed poets, colourful garlands, all these do bring happiness to the heart s of some people.

पान्थस्त्रीविरहानलाहुतिकलामातन्वती मञ्जरी
माकन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्यते ।
अल्पास्ते नवपाटलापरिमलप्राग्भारपाटच्चरा
वान्ति क्लान्तिवितानतानवकृतः श्रीखण्डशैलानिलाः ॥ श्रृ-८४ ॥

*अ : अधुना माकन्देषु पान्थ-स्त्री-विरह-अनल-आहुति-कलाम् आतन्वती मञ्जरी पिक-अङ्गनाभिः स-उत्कण्ठम् आलोक्यते । नव-पाटला-परिमल-प्राग्भार-पाटच्चराः क्लान्ति-वितान-तानव-कृतः ते अल्पाः श्रीखण्ड-शैल-अनिलाः वान्ति ।*

Female cuckoos  longingly look at the cluster of mango blossoms which act as offerings to the fire of separation felt by ladies whose husbands are away on travel. Mild winds blow from Srikhanda mountain which are prone to steal the fragrance of fresh Patala flowers and which diminish the spread of weariness.

प्रथितः प्रणयवतीनां तावत्पदमातनोतु हृदि मानः ।
भवति न यावच्चन्दनतरुसुरभिर्मलयपवमानः ॥ शृ-८५ ॥

*अ: प्रणयवतीनां प्रथितः मानः तावत् हृदि पदम् आतनोतु यावत् मलय-पवमानः चन्दन-तरु-सुरभिः न भवति ।*

May the famous ego of ladies who are in love stay on so long as the wind from Malaya mountain does not carry the fragrance of sandal trees.

सहकारकुसुमकेसरनिकरभरामोदमूर्च्छितदिगन्ते ।
मधुरमधुविधुरमधुपे मधौ भवेत्कस्य नोत्कण्ठा ॥ शृ-८६ ॥
*अ: सहकार-कुसुम-केसर-निकर-भर-आमोद-मूर्च्छित-दिगन्ते मधुर-मधु-विधुर-मधुपे मधौ कस्य उत्कण्ठा न भवति ?*
At the time of spring when the horizon is full of intense fragrance of the filaments of mango flowers and when honey bees are agitated by the sweet honey (of the flowers), who does not long for one's beloved?

अच्छाच्छचन्दनरसार्द्रतरा मृगाक्ष्यो
धारागृहाणि कुसुमानि च कौमुदी च ।
मन्दो मरुत्सुमनसः शुचि हर्म्यपृष्ठं
ग्रीष्मे मदं मदनं च विवर्धयन्ति ॥ शृ-८७ ॥
*अ: ग्रीष्मे अच्छ-अच्छ-चन्दन-रस-आर्द्र-तराः मृग-अक्ष्यः धारा-गृहाणि कुसुमानि कौमुदी च सुमनसः मन्दः मरुत् शुचि हर्म्य-पृष्ठं मदं मदनं च विवर्धयन्ति ।*
In summer doe-eyed ladies who are moist with very pure sandal paste, bath rooms with water streams, flowers, moonlight, mild wind from flowers and clean palace grounds increase intoxication and romance.

स्रजो हृद्यामोदा व्यजनपवनश्चन्द्रकिरणाः
परागः कासारो मलयजरजः शीधु विशदम् ।
शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशः
निदाघर्तावेतद्विलसति लभन्ते सुकृतिनः ॥ शृ-८८ ॥
*अ: हृद्य-आमोदाः स्रजः, व्यजन-पवनः चन्द्रकिरणाः परागः कासारः विशदं शीधु,शुचिः सौध-उत्सङ्गः प्रतनु वसनं पङ्कजदृशः निदाघ ऋतौ विलसति सुकृतिनः एतत् लभन्ते ।*
Enchanting fragrant garlands, breeze of a fan, moon-light, pollen of flowers, a lake, clear liquor, palace terrace, very thin clothing, lotus-eyed ladies, all these are available for the lucky while summer flourishes.

सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरः
प्रियावक्त्राम्भोजं मलयजरजश्चातिसुरभि ।
स्रजो हृद्यामोदास्तदिदमखिलं रागिणि जने
करोत्यन्तः क्षोभं न तु विषयसंसर्गविमुखे ॥ शृ-८९ ॥
*अ: सुधा-शुभ्रं धाम, स्फुरत्-अमल-रश्मिः शशधरः, प्रिया-वक्त्र-अम्भोजं, अति-सुरभि चन्दन-रजः च, हृद्य-आमोदाः स्रजः, रागिणि जने तत् इदम् अखिलं अन्तः-क्षोभं करोति, विषय-संसर्ग-विमुखे न ।*

Milk-white residence, moon with glistening clear rays, the lotus-like face of a beloved, fragrant sandal dust, enchanting fragrant garlands all these bring distress to lovelorn men, but does not affect those who have turned away from sensual pleasures.

तरुणीवेषोद्दीपितकामा
विकसज्जातीपुष्पसुगन्धिः ।
उन्नतपीनपयोदरभारा
प्रावृट् तनुते कस्य न हर्षम् ॥ शृ-९० ॥
*अ: उद्दीपित-कामा विकसत्-जाती-पुष्प-सुगन्धिः उन्नत-पीन-पयोदर-भारा प्रावृट् कस्य हर्षं न तनुते?*
Who does not feel joyful during rainy season which is weighed down by heavy rain-bearing clouds and which enhances romantic desires with its fragrance of blossoming Jati flower like a woman who is romantically inclined who is bearing fragrant Jati flowers and who is weighed down by heavy breasts? [The poet brings out the similarity through श्लेष pun.]

वियदुपचितमेघं भूमयः कन्दलिन्यः
नवकुटजकदम्बामोदिनो गन्धवाहाः ।
शिखिकुलकलकेकारावरम्या वनान्ताः
सुखिनमसुखिनं वा सर्वमुत्कन्ठयन्ति ॥ शृ-९१ ॥
अ: उपचित-मेघं वियत्, कन्दलिन्यः भूमयः, नव-कुटज-कदम्ब-आमोदिनः गन्धवाहाः, शिखि-कुल-कल-केका-राव-रम्याः वन-अन्ताः सुखिनम् असुखिनम् वा सर्वम् उत्कण्ठयन्ति ।
The sky covered over with clouds, the earth covered with new shoots, the wind carrying the fragrance of mountain jasmine and kadamba flowers and forest interiors enchantingly full of shrill sounds of peacocks make everyone, whether happy or unhappy, long for love.

उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः ।
क्षितिरपि कन्दलधवला दृष्टिं पथिकः क्व पातयति ॥ शृ-९२ ॥
अ: उपरि घन-पटलं घनम्, तिर्यक् अपि नर्तित-मयूराः गिरयः, क्षितिः अपि कन्दल-धवला, पथिकः दृष्टिं क्व पातयति?
Dark mass of clouds are above, hills full of dancing peacocks are all round, the earth white with new shoots is (below); where does (the poor) traveller cast his eyes?

इतो विद्युद्वल्लीविलसितमितः केतकितरोः
स्फुरन्गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकीक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्त्येते विरहदिवसाः सम्भृतरसाः ॥ शृ-९३ ॥

अ: इतः विद्युत्-वल्ली-विलसितम्, इतः केतकि-तरोः स्फुरन्-गन्धः, इतः प्रोद्यत्-जलद-निनद-स्फूर्जितम्, इतः केकी-क्रीडा-कलकल-रवः, पक्ष्मल-दृशां एते सम्भृत-रसाः विरह-दिवसाः कथं यास्यन्ति?

Here is the playfulness of creeper-like lightening; here is the sparkling fragrance of ketaka trees; thither is rumbling of rising couds; thither  the crackling sound of playful peacocks. How do these nights laden with delight pass of for lovelorn ladies with long eye-lashes?

असूचीसञ्चारे तमसि नभसि प्रौढजलद-
ध्वनिप्राज्ञंमन्ये पतति पृषतानां च निचये ।
इदं सौदामन्याः कनककमनीयं विलसितं
मुदं च म्लानिं च प्रथयति पथि स्वैरसुदृशाम् ॥ शृ-९४ ॥

*अ: तमसि अ-सूची-सञ्चारे, नभसि प्रौढ-जलद-ध्वनि-प्राज्ञंमन्ये, पृषतानां च निचये पतति (सति), इदं सौदामन्याः कनक-कमनीयं विलसितं स्वैर-सुदृशां पथि मुदं म्लानिं च प्रथयति ।*

When there is darkness where not even a needle could move and clouds feigning scholarship through their rumblings are in the sky, and groups of water drops are falling, this attractive golden lightening brings at once pleasure and pain to ladies on their way to their lovers.

आसारेण न हर्म्यतः प्रियतमैर्यातुं बहिः शक्यते
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिङ्ग्यते ।
जाताः शीकरशीतलाश्च मरुतो रत्यन्तखेदच्छिदो
धन्यानां बत दुर्दिनं सुदिनतां याति प्रियासङ्गमे ॥ शृ-९५ ॥

*अ: आसारेण प्रियतमैः हर्म्यतः बहिः यातुं न शक्यते । शीत-उत्कम्प-निमितं आयत-दृशा गाढं समालिङ्ग्यते । शीकर-शीतलाः मरुतः रति-अन्त-खेद-छिदः । धन्यानां प्रिया-सङ्गमे दुर्दिनं सुदिनतां याति, बत ।*

Due to torrential rain lovers are not able to go out; they are tightly embraced by the wide-eyed ladies due to the shivering cold; the wind cool like water spray blows to destroy the fatigue caused by romantic dalliance. Hark! For the lucky persons dark cloudy days turn out to be good days.

अर्धं सुप्त्वा निशायाः सरभससुरतायाससन्नश्लथाङ्गः
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।
सम्भोगक्लान्तकान्ताशिथिलभुजलतावर्जितम् कर्करीतो
ज्योत्स्नाभिन्नाच्छधारं न पिबति सलिलं शारदं मन्दपुण्यः ॥ शृ-९६ ॥

*अ: निशायाः अर्धं सुप्त्वा सरभस-सुरत-आयास-सन्न-श्लथ-अङ्गः प्रोद्भूत-असह्य-तृष्णः मधु-मद-निरतः विविक्ते हर्म्य-पृष्ठे कर्करीतः सम्भोग-क्लान्त-कान्ता-शिथिल-भुज-लता-आवर्जितं ज्योत्स्ना-अभिन्न-अच्छ-धारं शारदं सलिलं मन्द-पुण्यः न पिबति ।*

After having slept half of the night with his body weary of the strain of fast love play and feeling uncontrollable thirst and delighting in the intoxication of liquor it is (only) an unlucky person who does not drink the cool autumnal water flowing like pure moonlight poured by the beloved lady weary and tired of the acts of love play in the lonely upper floors of palaces.

हेमन्ते दधिदुग्धसर्पिरशना मञ्जिष्ठवासोभृतः
काश्मीरद्रवसान्द्रदिग्धवपुषश्छिन्ना विचित्रै रतैः ।
वृत्तोरुस्तनकामिनीजनकृताश्लेषा गृहाभ्यन्तरे
ताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ शृ-९७ ॥
*अ: हेमन्ते दधि-दुग्ध-सर्पिः-अशनाः मञ्जिष्ठ-वासः-भृतः काश्मीर-द्रव-सान्द्र-दिग्ध-वपुषः विचित्रैः रतैः छिन्नाः वृत्त-उरु-स्तन-कामिनी-जन-कृत-आश्लेषाः ताम्बूली-दल-पूग-पूरित-मुखाः धन्याः गृह-अभ्यन्तरे सुखं शेरते ।*
In winter having taken food of curds, milk and ghee wearing bright red garments with their bodies smeared with thick saffron paste and feeling exhausted after varied forms of love play, embraced by ladies having heavy round breasts and with their mouths full of betel leaves and areca nut lucky men sleep inside residences.

प्रोद्यत्प्रौढप्रियङ्गुद्युतिभृति विकसत्कुन्दमाद्यद्द्विरेफे
काले प्रालेयवातप्रचलविलसितोदारमन्दारधाम्नि ।
येषां नो कण्ठलग्ना क्षणमपि तुहिनक्षोददक्षा मृगाक्षी
तेषामायामयामा यमसदनसमा यामिनी याति यूनाम् ॥ शृ-९८ ॥
*अ: प्रोद्यत्-प्रौढ-प्रियङ्गु-द्युति-भृति विकसत्-कुन्द-माद्यत्-द्विरेफे काले प्रालेय-वात-प्रचल-विलसित-उदार-मन्दार-धाम्नि येषां यूनाम् तुहिन-क्षोद-दक्षा मृगाक्षी क्षणम् अपि नो कण्ठ-लग्ना तेषाम् यामिनी आयाम-यामा यम-सदन-समा याति ।*
During a season which bears the lustre of ripe rising Priyangu (a plant), when the bumble bees are intoxicated by the blooming Kunda flowers, when beautiful Mandara flowers open up due to icy winds, the young men who are not embraced by doe-eyed ladies who are capable of preventing cold spend hellish long nights.

चुम्बन्तो गण्डभित्तीरलकवति मुखे सीत्कृतान्यादधाना
वक्षःसूत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
ऊरूनाकम्पयन्तः पृथुजघनतटात्स्रंसयन्तोंऽशुकानि
व्यक्तं कान्ताजनानां विटचरितभृतः शैशिरा वान्ति वाताः ॥ शृ-९९ ॥
*अ: कान्ताजनानां गण्डभित्तीः चुम्बन्तो अलकवति मुखे सीत्कृतानि आदधानाः वक्षःसु उत्कञ्चुकेषु स्तन-भर-पुलक-उद्भेदम् आपादयन्तः ऊरून् आकम्पयन्तः पृथु-जघन-तटात् अंशुकानि स्रंसयन्तः विट-चरित-भृतः शैशिराः वाताः व्यक्तं वान्ति ।*
In winter winds clearly blow imitating life-loving persons by kissing the wall-like cheeks of lovely ladies, making slurping sounds at their faces having curly hair, creating goose

bump at the breasts with the upper garment lifted up, shaking the thighs  and loosening the garment from the heavy hips.

केशानाकुलयन् दृशो मुकुलयन् वासो बलादाक्षिपन्
आतन्वन् पुलकोद्गमं प्रकटयन्नावेगकम्पं शनैः ।
वारंवारमुदारसीत्कृतकृतो दन्तच्छदान्पीडयन्
प्रायः शैशिर एष सम्प्रति मरुत्कान्तासु कान्तायते ॥ शृ-१०० ॥
*अ: केशान् आकुलयन् दृशः मुकुलयन् वासः बलात् आक्षिपन् पुलक-उद्गमम् आतन्वन् शनैः आवेगकम्पं प्रकटयन् वारं वारम् उदार-सीत्कृत-कृतो दन्तच्छदान् पीडयन् प्रायः एषः शैशिरः मरुत् कान्तासु सम्प्रति कान्तायते ।*
This wintry wind mostly acts as a beloved to beautiful ladies by disturbing the hair, closing the eyes, pulling the garment forcefully, creating goose bump, slowly making them tremble, creating beautiful slurping sound often and troubling the lips
॥ इति सुभाषितत्रिशत्यां शृङ्गारशतकं सम्पूर्णम् ॥
End of Srngaarashatakam

# वैराग्यशतकम्

## मङ्गलश्लोकः

### Benedictory verse

चूडोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्
चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ वै-१ ॥
अन्वयः: चूड-उत्तंसित-चन्द्र-चारु-कलिका-चञ्चत्-शिखा-भास्वरः लीला-दग्ध-विलोल-काम-शलभः ज्ञानप्रदीपः हरः योगिनां चेतः-सद्मनि श्रेयः-दशा-अग्रे स्फुरन् अन्तः-स्फूर्जत्-अपार-मोह-तिमिर-प्राग्भारम् उच्चाटयन् विजयते ।
Shiva whose unsteady lock of hair where the bud-like moon appearing as a hair-crest is shining and who easily burnt the tremulous moth called Manmatha, flourishes in all his glory residing in the hearts of ascetics shining in the forefront during auspicious moments and vanquishing the thick darkness of boundless delusion roaring internally. (Verbs जयतु, जयति, विजयते etc. which are often used in benedictory verses convey the sense of “flourishing in all its glory” although the literal meaning is “to be victorious”. )

## तृष्णादूषणम्

( Censuring desire)
भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि संतुष्यसि ॥ वै-२ ॥
*अ: अनेक-दुर्ग-विषमं देशं भ्रान्तम् ,फलं न किञ्चित् (अपि) प्राप्तम्; उचितं जाति-कुल-अभिमानं त्यक्त्वा कृता सेवा निष्फला; पर-गृहेषु आशङ्कया काकवत् मान-विवर्जितं भुक्तम्; पाप-कर्म-पिशुने तृष्णे! जृम्भसि, अद्य अपि न सन्तुष्यसि ।*
O Greed manifesting wretched actions ! many places dangerous and difficult to access were traversed fruitlessly; sacrificing the self respect proper for the community and family, fruitless service was rendered; Without self-respect (food) was eaten with apprehension in others’ houses like a crow; you are still growing and do not feel satisfied.

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन सन्तोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥ वै-३ ॥
*अ: निधि-शङ्कया क्षिति-तलम् उत्खातम् । गिरेः धातवः ध्माताः । सरितां पतिः निस्तीर्णः । नृपतयः यत्नेन सन्तोषियाः । निशाः श्मशाने मन्त्र-आराधन-तत्परेण मनसा नीताः । मया काण-वराटकः अपि न प्राप्तः । (हे) तृष्णे, सकामा भव ।*
With the hope of a treasure ground was dug up; oars of mountains were blown (in a smelter); ocean was crossed over; kings were appeased with effort; nights were spent in cemeteries with mind concentrating on the chant; not even a perforated cowrie was got by me; dear greed, be satisfied.

खलालापाः सोढाः कथमपि तदाराधनपरैः
निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥ वै-४ ॥
*अ: तत्-आराधन-परैः (कृताः) खल-आलापाः कथम् अपि सोढाः । अन्तर्-बाष्पं निगृह्य शून्येन मनसा हसितम् अपि । वित्त-स्तम्भ-प्रतिहत-धियाम् अञ्जलिः अपि कृतः ।*
*(हे) मोघ-आशे आशे , अतः किम् अपरं मां नर्तयसि?*
I somehow tolerated wicked talk by those who indulge in it; I feigned laughter suppressing the tears; I even bowed to those whose mental faculty was stupefied by wealth; dear greed with unfulfilled desires, how much more do you make me dance (to your tunes)?

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं मानव्रीडैर्निजगुणकथापातकमपि ॥ वै-५ ॥
*अ: तुलित-बिसिनी-पत्र-पयसां अमीषां प्राणानां कृते विगलित-विवेकैः अस्माभिः किं न व्यवसितम्? यत् द्रविण-मद-निःसंज्ञ-मनसां आढ्यानाम् अग्रे मानव्रीडैः निज-गुण-कथा-पातकम् अपि कृतम् ।*
We shamelessly committed the crime of narrating our own virtues before the rich whose minds are insensitive due to the arrogance of money. What is it that we, deprived of discrimination, did not do for the sake of our lives which are like water on the lotus leaf?

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शम्भोः पदं
तत्तत्कर्मकृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥ वै-६ ॥

*अ: क्षान्तं, (तु) न क्षमया; गृह-उचित-सुखं त्यक्तं, (तु) न सन्तोषतः; दुःसह-शीत-वात-तपन-क्लेशाः सोढाः (तु) तपः न तप्तम्; नियमित-प्राणैः अहः-निशम् वित्तं ध्यातं,न (तु) शम्भोः पदम्; यत् एव मुनिभिः कृतं तत् तत् कर्म कृतम्, (तु) तैः तैः फलैः वञ्चिताः।*
We tolerated but not with a sense of forgiving; we left homely comforts but not with joy; we endured the distress caused by unbearable cold, wind and heat, but we did not do penance; controlling our breath we thought of money day and night, but we did not think of Shiva's abode; What sages did we also did, but we were denied the fruits (that they got).

भोगा न भुक्ताः वयमेव भुक्ताः तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याताः तृष्णा न जीर्णा वयमेव जीर्णाः ॥ वै-७ ॥
*अ: भोगाः न भुक्ताः, वयम् एव भुक्ताः; तपः न तप्तम्, वयम् एव तप्ताः, कालः न यातः, वयम् एव याताः; तृष्णा न जीर्णा, वयम् एव जीर्णाः ।*
We did not enjoy pleasures, we only were eaten up; we did not do penances, only we were distressed; time did not pass on, only we passed on; greed did not wear out, only we decayed. [ Contextual different shades of meaning of words भुक्त, तप्त, यात, जीर्ण have been beautifully played upon.]

वलीभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ वै-८ ॥
*अ: मुखं वलीभिः आक्रान्तम्, शिरः पलितेन अङ्कितम्, गात्राणि शिथिलायन्ते, तृष्णा एका तरुणायते ।*
The face is over run by wrinkles, head is marked by grey hair, limbs have become loose, only greed is getting younger.

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो मूढः कायस्तदपि मरणापायचकितः ॥ वै-९ ॥
*अ: भोग-इच्छा निवृत्ता; पुरुष-बहुमानः अपि गलितः; जीवित-समाः समानाः सुहृदः स्वर् याताः; शनैः यष्टि-उत्थानं, नयने घन-तिमिर-रुद्धे च; तत् अपि मूढः कायः मरण-अपाय-चकितः (इति) अहो ।*
The desire to enjoy bodily pleasures is gone, self-respect has also waned, friends who were dear as one's own life have gone to heaven; getting up slowly is with the help of a stick; eyesight is affected by advanced cataract; in spite of all this the stupid body is afraid of death.

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी

तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ वै-१० ॥
*अ: आशा नाम नदी मनोरथ-जला, तृष्णा-तरङ्ग-आकुला, राग-ग्राहवती, वितर्क-विहगा, धैर्य-द्रुम-ध्वंसिनी, मोह-आवर्त-सुदुस्तरा, अति-गहना प्रोतुङ्ग-चिन्ता-तटी , तस्याः पार-गताः विशुद्ध-मनसः योगि-ईश्वराः नन्दन्ति ।*
Desire is a river which has intentions as water, waves called greed, is infested with crocodiles called lust and birds called doubt, which destroys trees called courage, which is difficult to cross because of whirl pools called delusion, which has steep and high banks called worry. Yogis with pure mind are happy having crossed that river.

## विषयपरित्यागविडम्बना

( A critique on discarding sensory pleasures)

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ।
महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ वै-११ ॥
*अ: संसार-उत्पन्नं चरितं कुशलं न अनुपश्यामि । पुण्यानां विपाकः विमृशतः मे भयं जनयति । महद्भिः पुण्य-ओघैः चिर-परिगृहीताः विषयाः च विषयिणां व्यसनं दातुम् इव महान्तः जायन्ते ।*
I do not see anything good in worldly life. When analyzed, the result of past good deeds frightens me. The sensory pleasures which have been earned for long by a flood of great good deeds in the past will only grow as if to cause sorrow to those clinging to them.

अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ वै-१२ ॥
*अ: विषयाः चिरतरम् उषित्वा अपि यातारः । वियोगे भेदः कः? जनः स्वयम् अमून् न त्यजति (इति) यत्, स्वातन्त्र्यात् व्रजन्तः (विषयाः) मनसः अतुल-परितापाय (भवन्ति) । एते स्वयं त्यक्ता अनन्तं शम-सुखं विदधति हि ।*
Sensory pleasures will depart even after staying for long. What is the difference in parting? If man does not discard them himself, they cause immense pain. If they are voluntarily discarded they provide endless joy and peace.

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।
संप्राप्तान्न पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययान्

वाञ्छामात्रपरिग्रहानपि परं त्यक्तुं न शक्ता वयम् ॥ वै-१३ ॥
अ: ब्रह्म-ज्ञान-विवेक-निर्मल-धियः अहो दुष्करं कुर्वन्ति यत् उपभोग-भाञ्जि अपि धनानि निःस्पृहाः एकान्ततः मुञ्चन्ति । परं वयं पुरा न संप्राप्तान् , संप्रति न (प्राप्यमानान्), प्राप्तौ न दृढ-प्रत्ययान् वाञ्छा-मात्र-परिग्रहान् अपि त्यक्तुं न शक्ताः ।
It is surprising how those who have a clear mind of discrimination arising out of the knowledge of Brahman become totally free from desire and give up wealth that provides them things of pleasure; we on the other hand are unable to give up craving for things which we never had in the past, are not having now and have no firm hopes of having in future.

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्
आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ वै-१४ ॥
अ: शकुनाः गिरि-कन्दरेषु वसतां परं ज्योतिः ध्यायतां धन्यानाम् आनन्द-अश्रु-कणान् अङ्के-शयाः निःशङ्कं पिबन्ति । मनोरथ-उपरचित-प्रासाद-वापी-तट-क्रीडा-कानन-केलि-कौतुक-जुषाम् अस्माकं आयुः तु परं क्षीयते ।
While the blessed living in mountain caves meditate on the Divine Light and shed tears of joy, birds drink them without any fear lying on their laps; our span of life, on the other hand, decreases while we imagine in our minds palaces, water pools, pleasure gardens, games and gaiety.

भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं विशीर्णशतखण्डमयी च कन्था
हा हा तथापि विषया न परित्यजन्ति ॥ वै-१५ ॥
अ: भिक्षा-अशनम्, तत् अपि नीरसम् एकवारं (च), भूः शय्या च, निज-देह-मात्रं परिजनः, वस्त्रं विशीर्ण-शत-खण्ड-मयी कन्था; तथा अपि विषया न परित्यजन्ति हा हा ॥
Food is by begging and it is tasteless and that too only once a day, sleeping is on bare earth, the only kin is one's own body and the clothing is a rag of hundreds of patches; even then sensual craving does not go away! Alas!

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरशिरः स्पर्धि जघनं
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ वै-१६ ॥
*अ: स्तनौ मांसग्रन्थी कनककलशौ इति उपमितौ, मुखं श्लेष्म-आगारं तत् अपि च शशाङ्केन तुलितम्, जघनं स्रवन् मूत्र-क्लिन्नं करि-वर-शिरः-स्पर्धि , मुहुः निन्द्यं रूपं कवि-जन-विशेषैः गुरु कृतम् ।*

Breasts which are glands of flesh are compared to golden pitchers; Face which is a store house of phlegm is compared to moon; the private part wet with urine is compared to the head of the best of elephants; a form which should be often reprehended is made lofty by the great poets.

एको रागिषु राजते प्रियतमादेहार्धहारी हरो
नीरागेषु जनो विमुक्तललनासङ्गो न यस्मात्परः ।
दुर्वारस्मरबाणपन्नगविषव्याविद्धमुग्धो जनः
शेषः कामविडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः ॥ वै-१७ ॥
*अ: एकः रागिषु प्रिय-तमा-देह-अर्ध-हारी हरः राजते, यस्मात् परः विमुक्त-ललना-सङ्गः जनः नीरागेषु न (अस्ति) । शेषः दुर्वार-स्मर-बाण-पन्नग-विष-व्याविद्ध-मुग्धः जनः काम- विडम्बितान् विषयान् भोक्तुं न क्षमः, मोक्तुं (च) न क्षमः ।*
Shiva who has carried half of the body of his beloved shines alone as the foremost among lovers and there is no one who excels him among the passion-free in being detached from the company of women. The rest who are entranced having been affected by the snake-poison of the arrows of irresistible cupid are neither capable of enjoying nor resisting the sensual pleasures accepted on account of cupid.

अजानन् दाहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ।
विजानन्तोऽप्येते वयमिह विपज्जालजटिलान्
न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ वै-१८ ॥
*अ: शलभः दाह-आत्म्यम् अजानन् तीव्र-दहने पततु, सः मीनः अपि अज्ञानात् बडिश-युतं पिशितम् अश्नातु, इह एते वयम् कामान् विपत्-जाल-जटिलान् विजानन्तः अपि न मुञ्चामः, मोह-महिमा गहनः अहह ।*
Let the moth fall into the fierce fire not knowing that it burns; let the fish eat the meat not knowing that it is baited; but we, even though fully knowing that desires are entangled in a network of hazards do not forsake them; deep indeed is the power of delusion!

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं
क्षुधार्तः शाल्यन्नं कवलयति मांसादिकलितम् ।
प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः ॥ वै-१९ ॥
*अ: जनः आस्ये तृषा शुष्यति शीत-मधुरं सलिलं पिबति; क्षुधा-आर्तः मांस-आदि-कलितं शाली-अन्नं कवलयति; काम-अग्नौ प्रदीप्ते वधूं सुदृढतरम् आलिङ्गति; व्याधेः प्रतीकारं सुखम् इति विपर्यस्यति ।*
A person drinks water which is sweet and cold when the mouth gets dried up due to thirst; afflicted by hunger he eats cooked rice mixed with meat etc; when the fire of

carnal desire is aflame he embraces his bride tightly; he mistakes as happiness a palliative for a disease.

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः सम्पदः
कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
सन्दृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु सन्न्यस्यति ॥ वै-२० ॥
*अ: अज्ञान-मूढः जनः तुङ्गं वेश्म, सताम् अभिमताः सुताः, सम्पदः संख्या-अतिगाः, दयिता कल्याणी, नवं वयः, विश्वम् अनश्वरं मत्वा संसार-कारागृहे निविशते । धन्यः तत् अखिलं क्षण-भङ्गुरम् सन्दृश्य सन्न्यस्यति ।*
A person gone astray by ignorance stays in the prison house of family entanglement believing that a lofty mansion, sons admired by the virtuous, un-countable wealth, a beloved worthy of honour, youth and this world are all permanent. A blessed person relinquishes them realizing that all that is perishable in a second.

## याच्ञादैन्यदूषणम्

(Criticizing begging and meanness)

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी ।
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ वै-२१ ॥
*अ: दीन-मुखैः क्षुधितैः क्रोशद्भिः शिशुकैः सदा एव आकृष्ट-जीर्ण-अम्बरा दीना निरन्न-विधुरा गेहिनी दृश्या न चेत्, कः मनस्वी पुमान् स्व-दग्ध-जठरस्य अर्थे याच्ञा-भङ्ग-भयेन गद्गद-गलत्-त्रुटत्-विलीन-अक्षरं देहि इति वदेत् ।*
If there were no house-wife looking wretched and miserable for want of food with crying hungry children having miserable faces tugging at her old garment, which respectable person begs for food just for the sake of his own burning stomach in broken halting stammering words with the fear that his request may be turned down?

अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीवितानकुठारिका
जठरपिठरी दुष्पूरेयं करोति विडम्बनम् ॥ वै-२२ ॥
*अ: इयं दुष्पूरा जठर-पिठरी अभिमत-महा-मान-ग्रन्थि-प्रभेद-पटीयसी गुरुतर-गुण-ग्राम-अम्भोज-उज्ज्वल-चन्द्रिका विपुल-विलसत्-लज्जा-वल्ली-वितान-कुठारिका विडम्बनं करोति ।*

This store room of a belly which is difficult to fill up, which is skilful in breaking the cherished knot called self respect, which acts as bright moonlight to the lotus of weighty and good qualities and which acts as an axe to the large glittering collection of creepers makes fun of us.

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालिं कपालिं
ह्यादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ।
द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येषु दीनः ॥ वै-२३ ॥
*अ: क्षुधा-आर्तः मानी उदर-दरी-पूरणाय पुण्ये ग्रामे महति वने वा सित-पट-छन्न-पालिं कपालिं आदाय न्याय-गर्भ-द्विज-हुत-हुतभुक्-धूम-धूम्र-उपकण्ठे द्वारं द्वारं प्रविष्टः प्राणैः सनाथः वरम्, न पुनः अनु-दिनं तुल्य-कुल्येषु दीनः (वरम्) ।*
It is better for a person of self respect who is hungry to manage to breathe and fill his stomach by entering door after door near a village which has become gray with the smoke of fire-offerings made by dutiful Brahmins rather than be miserable among his relatives.

गङ्गातरङ्गकणशीकरशीतलानि
विद्याधराध्युषितचारुशिलातलानि ।
स्थानानि किं हिमवतः प्रलयं गतानि
यत्सावमानपरपिण्डरता मनुष्याः ॥ वै-२४ ॥
*अ: मनुष्याः स-अवमान-पर-पिण्ड-रताः (इति) यत्, गङ्गा-तरङ्ग-कण-शीकर-शीतलानि विद्याधर-अध्युषित-चारु-शिलातलानि हिमवतः स्थानानि प्रलयं गतानि किम्?*
Is it that the Himalayan abodes which are cooled by the spray of the waves of Ganga and where Vidyadharas dwell on beautiful rocks have been lost in floods that people have become dependent on others for their daily bread? [ Vidyadharas are a kind of supernatural beings having magical powers and attending on Siva.]

किं कन्दाः निर्झरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ।
वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां
दुःखाप्तस्वल्पवित्तस्मयपवनवशानर्तितभ्रूलतानि ॥ वै-२५ ॥
*अ: निर्झरेभ्यः कन्दाः, निर्झराः गिरिभ्यः प्रलयम् उपगताः किम्? तरुभ्यः सरस-फल-भृतः वल्कलिन्यः च शाखाः प्रध्वस्ता वा? यत् अपगत-प्रश्रयाणां खलानां दुःख-आप्त-स्वल्प-वित्त-स्मय-पवन-वश-आनर्तित-भ्रू-लतानि मुखानि (याचकैः) वीक्ष्यन्ते ।*
Have the bulbous roots vanished from mountain streams or streams have vanished from mountains or branches of trees with their barks and juicy fruits have been destroyed that people are fondly looking at faces of the wicked persons devoid of

modesty and whose creeper-like eye-brows dance due to the gale like smile caused by having earned some wealth with great difficulty?

पुण्यैर्मूलफलैस्तथा प्रणयिनीं वृत्तिं कुरुष्वाधुना
भूशय्यां नवपल्लवैरकृपणैरुत्तिष्ठ यावो वनम् ।
क्षुद्राणामविवेकगूढमनसां यत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ वै-२६ ॥
*अ: अधुना पुण्यैः मूलफलैः प्रणयिनीं वृत्तिं कुरुष्व; तथा अ-कृपणैः नव-पल्लवैः भूशय्यां कुरुष्व; उत्तिष्ठ, वनं यावः यत्र अविवेक-गूढ-मनसां वित्त-व्याधि-विकार-विह्वल-गिरां क्षुद्राणां ईश्वराणां नाम सदा अपि न श्रूयते ।*
Adopt a lovely way of life by (enjoying) roots and fruits; sleep on the ground with tender sprouts as bed; let us go to the forest where not even the name of the small minded wealthy persons whose mind is closed due to absence of discrimination and whose manner of speaking is affected by a disease called money is heard.

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥ वै-२७ ॥
*अ: प्रति-वनं अखेदं स्वेच्छा-लभ्यं क्षितिरुहां फलम्, पुण्य-सरितां शिशिर-मधुरं पयः स्थाने स्थाने (स्वेच्छा-लभ्यम्); सु-ललित-लता-पल्लव-मयी मृदु-स्पर्शा शय्या; तत् अपि कृपणाः धनिनां द्वारि सन्तापं सहन्ते ।*
In every forest there are fruits of trees which are easily available as much as desired; at frequent intervals is available cold and sweet water from pious rivers; there is bed which is soft to touch and made of sprouts of lovely creepers; even then wretched people undergo troubles at the door of the wealthy.

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखभाजो
ये चाल्पत्वं दधति विषयापेक्षपर्याप्तबुद्धेः ।
तेषामन्तः स्फुरितहसितं वासराणि स्मरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ वै-२८ ॥
*अ: ये धन-पति-पुरः प्रार्थना-दुःख-भाजः, ये च विषय-अपेक्ष-पर्याप्त-बुद्धेः अल्पत्वं दधति, तेषां वासराणि शिखरि-कुहर-ग्राव-शय्या-निषण्णः ध्यान-छेदे अन्तः-स्फुरत-हसितं स्मरेयम् ।*
When meditation is broken while seated on a rock in a cave of a hill, I should remember smiling internally the days of those who undergo the grief of begging in front of the wealthy and those who bear the smallness of mind contented with the worldly desires.

ये सन्तोषनिरन्तरप्रमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलुब्धसङ्कुलधियस्तेषां न तृष्णा हता ।

इत्थं कस्य कृते कृतः स विधिना तादृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ वै-२९ ॥
*अ: ये सन्तोष-निरन्तर-प्रमुदिताः तेषां मुदः न भिन्नाः, अन्ये ये धन-लुब्ध-सङ्कुल-धियः तेषां तृष्णा न हता । इत्थं (स्थिते) स्व-आत्मनि एव समाप्त-हेम-महिमा मेरुः कस्य कृते कृतः? तादृक् सम्पदां पदं मे न रोचते ।*
Happiness of those who are all the time happy is not broken; and the greed of those whose mind is full of avarice for wealth is not killed. For whose sake is Meru mountain the fame of whose gold is only meant for itself created? I do not like that type of wealth.

भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वतो
दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।
सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शम्भोः सत्त्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ वै-३० ॥
*अ: योगीश्वराः अ-दैन्यम् अ-प्रति-सुखं सर्वतः भीति-छिदं दुर्-मात्सर्य-मद-अभिमान-मथनं दुःख-ओघ-विध्वंसनं सर्वत्र अनु-अहम् अ-प्रयत्न-सुलभं साधु-प्रियं पावनं शम्भोः सत्त्रं अवार्यम् अक्षय-निधिं भिक्षा-आहारं शंसन्ति ।*
The great saints speak of living on alms as not being mean, a pleasure to which there is no equal, which cuts off all round fear, which destroys haughtiness, intoxication and jealousy, which vanquishes the flood of unhappiness, which is available easily without effort, which is dear to the virtuous, which purifies, which is a homage to Siva and which is an irresistible inexhaustible treasure.

## भोगास्थैर्यवर्णनम्

(Impermanence of worldly pleasures)

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम्।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयम्
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥ वै-३१ ॥
*अ: भोगे रोग-भयं, कुले च्युति-भयं, वित्ते नृ-पालात् भयं, माने दैन्य-भयं, बले रिपु-भयं, रूपे जराया भयं, शास्त्रे वादि-भयं, गुणे खल-भयं, काये कृतान्तात् भयं, सर्वं वस्तु भय-अन्वितं, भुवि नृणां वैराग्यम् एव अभयम् ।*
There is the fear of diseases in worldly pleasures; in case of family nobility there is the fear of its being stained; in case of wealth there is the fear of its being taken away by the king; in case of self respect there is the fear of becoming miserable; in case of an army there is the fear of an enemy; in case of handsomeness there is the fear of old age; in case of scholarship there is the fear of being defeated by an opponent; in case

of virtue there is the fear of the wicked; in case of human body there is the fear of death; everything in this world is full of fear, it  is only in renunciation that there is no fear.

आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनं
सन्तोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनैः
अस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ वै-३२ ॥
*अ: जन्म मरणेन आक्रान्तम्, अति-उज्ज्वलं यौवनं जरसा च, सन्तोषः धन-लिप्सया, शम-सुखं प्रौढ-अङ्गना-विभ्रमैः, गुणाः मत्सरिभिः लोकैः, वन-भुवः व्यालैः, नृपाः दुर्जनैः, विभूतयः अपि अस्थैर्येण उपहताः । किं वा केन न ग्रस्तम् ?*
Birth is overrun by death, bright youth by old age, happiness by desire for money, joy of peace by the attractions of mature women, virtues by envious people, forests by wild animals, kings by wicked people, glories are weakened by impermanence. What is that is not eclipsed by something else?

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्
तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम् ॥ वै-३३ ॥
*अ: जनस्य आरोग्यं विविधैः आधि-व्याधि-शतैः उन्मूल्यते । यत्र लक्ष्मीः तत्र व्यापदः विवृत-द्वाराः इव पतन्ति । मृत्युः जातं जातं अवश्यं आशु आत्मसात् विवशं करोति । तेन निरङ्कुशेन विधिना यत् सुस्थिरं तत् निर्मितं किम्?*
Health of people is uprooted by hundreds of mental and physical afflictions. Wherever there is wealth misfortunes fall in as if through an open door. Death quickly and compulsorily takes control of every life born. Has the uncontrolled creator created anything which is firm and stable?

भोगास्तुङ्गतरङ्गभङ्गतरलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखस्फूर्तिः प्रियासु स्थिता ।
तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ वै-३४ ॥
*अ: भोगाः तुङ्ग-तरङ्ग-भङ्ग-तरलाः, प्राणाः क्षण-ध्वंसिनः यौवन-सुख-स्फूर्तिः स्तोकानि एव दिनानि प्रियासु स्थिता । (हे) बोधकाः बुधाः, तत्-संसारम् असारम् एव इति बुद्ध्वा लोक-अनुग्रह-पेशलेन मनसा यत्नः समाधीयताम् ।*
Pleasures are as unsteady as high waves; life can get terminated in a moment; manifestation of youthful happiness rests in ladies only for a few days. Therefore, O learned preceptors!  having understood that this worldly life is worthless please attempt (to provide salvation to the ordinary folk) with a benevolent attitude towards them.

भोगा मेघवितानविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम् ।
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धसुलभे बुद्धिं विदध्वं बुधाः ॥ वै-३५ ॥
*अ: (हे) बुधाः! भोगाः मेघ-वितान-विलसत्-सौदामिनी-चञ्चला, आयुः वायु-विघट्टित-अब्ज-पटली-लीन-अम्बुवत् भङ्गुरम्, तनु-भृताम् यौवन-लालसाः लोलाः इति आकलय्य धैर्य-समाधि-सिद्ध-सुलभे बुद्धिं विदध्वम् ।*
O Scholars!  Pleasures are as unsteady as lightening in a canopy of clouds; longevity is as fragile as the water clinging to the little stalk of a lotus being thrashed by winds; youthful attachments of men are transient. Having known all this in totality concentrate your minds on (salvation) which is easy to attain with fortitude and meditation.

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीः
अर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥ वै-३६ ॥
*अ: आयुः कल्लोल-लोलं, यौवन-श्रीः कतिपय-दिवस-स्थायिनी, अर्थाः संकल्प-कल्पाः, भोग-पूगाः घन-समय-तडित्-विभ्रमाः, प्रियाभिः प्रणीतं यत् कण्ठ-आश्लेष-उपगूढं तत् अपि न चिरम् ।भव-अम्बोधि-पारं तरीतुं ब्रह्मणि आसक्ता भवत ।*
Longevity is as fragile as waves; the grandeur of youth stays only for a few days; wealth is as transient as our desires; the multitudes of pleasures have the playfulness of lightening in rainy season. Even the tight embraces offered by your ladies are temporary; please concentrate on Brahman in order to cross the ocean of worldly life.

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः ।
वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ वै-३७ ॥
*अ: गर्भ-वासे नियमित-तनुभिः कृच्छ्रेण अमेध्य-मध्ये स्थीयते । यौवने च उपभोगः कान्ता-विश्लेष-दुःख-व्यतिकर-विषमः । वृद्ध-भावः अपि वामाक्षीणां अवज्ञा-विहसित-वसतिः असाधुः । रे मनुष्याः! संसारे यदि सुखं किञ्चित् स्वल्पम् अस्ति किम्? वदत ।*
While in the womb, one stays amidst filth in a restricted form with difficulty; during youth, enjoyment is mixed with the pain of being away from the beloved; old age is also unpleasant being mocked at by smiling ladies with beautiful eyes. O men! Tell me, is there any tiny bit which is pleasant in this worldly life?

व्याघ्रीव तिष्टति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो

लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ वै-३८ ॥
*अ: जरा परितर्जयन्ती व्याघ्री इव तिष्ठति, रोगाः च देहं शत्रवः इव प्रहरन्ति, आयुः भिन्न-घतात् अम्भः इव परिस्रवति, तथा अपि लोकः अहितम् आचरति इति चित्रम् ।*
Old age waits upon one threatening like a tigress; diseases strike the body like enemies; span of life leaks away like water from a broken pot; it is strange that even then people act in a harmful manner.

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवः
तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
कामोत्पत्तिवशात्स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥ वै-३९ ॥
*अ: रे लोकाः! बहु-विधाः भोगाः भङ्गुर-वृत्तयः, तैः एव अयं भवः । तत् कस्य कृते इह परिभ्रमत? चेष्टितैः कृतम् । अस्मद् वचः श्रद्धेयं यदि, आशा-पाश-शत-उपशान्ति-विशदं चेतः काम-उत्पत्ति-वशात् स्व-धामनि समाधीयताम् ।*
O people!  All types of pleasures are of temporary nature; all the worldly problems are because of them only. For what purpose do you all run around? Stop your activities. If you have faith in what we say, bring your mind cleared by the cessation of hundreds of desires to meditate on the dwelling of your soul.

ब्रह्मेन्द्रादिमरुद्गणान् तृणकणान्यत्र स्थितो मन्यते
यत्स्वादाद्विरसा भवन्ति विभवाः त्रैलोक्यराज्यादयः ।
भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते
भो साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥ वै-४० ॥
*अ: कः अपि भोगः यत्र स्थितः ब्रह्म-इन्द्र-आदि-मरुत्-गणान् तृण-कणान् मन्यते, यत्-स्वादात् त्रैलोक्य-राज्य-आदयः विभवाः विरसाः भवन्ति, सः एकः एव नित्य-उदितः जृम्भते । भो साधो! क्षण-भङ्गुरे तत्-इतरे भोगे रतिं मा कृथाः ।*
There is an inexplicable pleasure which alone flourishes eternally lofty. Having obtained that pleasure one considers (divine dignitaries like) Brahma, Indra, the wind God and others equal to blades of grass, and having tasted that pleasure suzerainty over the three worlds becomes tasteless. O virtuous man!  Do not indulge in other transient pleasures.

## कालमहिमानुवर्णनम्

( In praise of Time )

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रं च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।

उद्वृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ वै-४१ ॥
*अ: सा नगरी रम्या, सः नृपतिः रम्यः, तत् सामन्त-चक्रम्, तस्य पार्श्वे सा विदग्ध-परिषत्, ताः चन्द्र-बिम्ब-आननाः, सः उद्वृत्तः राजपुत्र-निवहः, ते बन्दिनः, ताः कथाः ! यस्य वशात् सर्वं स्मृति-पथम् अगात् तस्मै कालाय नमः ।*
That beautiful city, that great king, that circle of vassals, that learned assembly by his side, those moon faced women, that haughty group of princes, those prisoners, and those stories! Our obeisance to Time on account of which everything is just a memory!

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैकः
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं नेयौ रजनिदिवसौ लोलयन्द्वाविवाक्षौ
कालः कल्यो भुवनफलके क्रीडति प्राणिशारैः ॥ वै-४२ ॥
*अ: यत्र क्वचित् गृहे अनेकः अतिष्ठत्, अथ तत्र एकः तिष्ठति, अपि यत्र एकः तदनु बहवः अन्ते च न एकः अपि, इत्थं कल्यः कालः रजनि-दिवसौ द्वौ अक्षौ इव लोलयन्, भुवन-फलके प्राणि-शारैः क्रीडति ।*
In a house where there were many there is one now; where there was one, now there are many and in the end no one; thus time plays with the dices of day and night on the playing board of this world using living beings as play-pieces.

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितम्
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ वै-४३ ॥
*अ: जीवितं आदित्यस्य गत-आगतैः अहः-अहः संक्षीयते । कालः अपि बहु-कार्य-भार-गुरुभिः व्यापारैः न ज्ञायते । जन्म-जरा-विपत्ति-मरणं दृष्ट्वा त्रासः च न उत्पद्यते । जगत् मोहमयीं प्रमाद-मदिरां पीत्वा उन्मत्त-भूतम् ।*
With sun’s rising and setting span of life gets reduced; Passage of time is not noticed because of various pressing activities; one does not get anxious seeing birth, old age, disease and death; the world is intoxicated by drinking liquor of faults which causes delusion.

रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभूतविषयैरित्थं विधेनामुना
संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे ॥ वै-४४ ॥

*अ: सा एव रात्रिः, पुनः सः एव दिवसः (इति) मुधा मत्वा जन्तवः उद्यमिनः तथा पुनः-उक्त-भूत-विषयैः व्यापारैः निभृत-प्रारब्ध-तत्-तत्-क्रियाः धावन्ति एव । इत्थंविधेन अमुना संसारेण कदर्थिता वयं मोहात् न लज्जामहे, अहो ।*

Living beings keep running, planning and secretly starting in the planned matters believing that night is the same and the day is the same. It is a pity that we do not feel ashamed of getting deluded by this type of demeaning worldly matters.

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकवाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितम्
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥ वै-४५ ॥

*अ: संसार-विच्छित्तये ईश्वरस्य पदं न ध्यातम्, स्वर्ग-द्वार-कपाट-पाटन-पटुः धर्मः अपि न उपार्जितः, नारी-पीन-पयोधर-ऊरु-युगलं स्वप्ने अपि न आलिङ्गितम् । वयं मातुः यौवन-वन-छेदे केवलं कुठाराः ।*

We did not meditate on the abode of the Almighty for breaking the cycle of births; we did not earn religious merit capable of opening the doors of heaven; we did not embrace the heavy breasts and thighs of women even in our dreams. We are just axes which cut the garden of mothers' youth.

नाभ्यस्ता प्रतिवादवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ।
कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥ वै-४६ ॥

*अ: विनीत-उचिता प्रतिवाद-वृन्द-दमनी विद्या न अभ्यस्ता, करि-कुम्भ-पीठ-दलनैः खड्ग-अग्रैः यशः नाकं न नीतम्, कान्ता-कोमल-पल्लव-अधर-रसः चन्द्र-उदये न पीतः, शून्य-आलये दीपवत् तारुण्यं निष्फलं गतम् एव, अहो ।*

We did not acquire the learning which is proper for a well-behaved person and which silences the arguments of opponents; we did not acquire fame which reaches the sky by the sharp edge of our sword capable of piercing the humps of elephants; we did not drink the juice of delicate sprout-like lips of the beloved; our youth went waste like a lamp in an empty house.

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता ।
आलोलायतलोचनाः प्रियतमाः स्वप्नेऽपि नालिङ्गिताः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते ॥ वै-४७ ॥

*अ: कलङ्क-रहिता विद्या न अधिगता, वित्तं न उपार्जितं च, समाहितेन मनसा पित्रोः शुश्रूषा अपि न सम्पादिता, आलोल-आयत-लोचनाः प्रियतमाः स्वप्ने अपि न आलिङ्गिताः, अयं कालः पर-पिण्ड-लोलुपतया काकैः इव प्रेर्यते ।*

We did not acquire blemish-less learning; we did not acquire wealth; we did not serve our parents with composed mind; even in our dreams we did not embrace beloveds with broad rolling eyes. We spend our time like crows ardently longing for a morsel from others.

वयं येभ्यो जाताश्चिरपरिचिता एव खलु ते
समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।
इदानीमेते स्मः प्रतिदिवसमासन्नपतना
गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ वै-४८ ॥
*अ: येभ्यः वयं जाताः ते, यैः समं संवृद्धाः चिर-परिचिताः ते अपि स्मृति-विषयतां गमिताः, इदानीम् एते (वयं) प्रतिदिवसम्-आसन्न-पतनाः सिकतिल-नदी-तीर-तरुभिः तुल्य-अवस्थां गताः स्मः ।*
Those to whom we were born and those who grew with us have just become a memory although they are all very familiar. Now we are in the same state as that of trees on sandy banks of rivers which face imminent fall every day.

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
तेषां व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ वै-४९ ॥
*अ: नृणाम् आयुः वर्षशतं परिमितम्, तत्-अर्धं रात्रौ गतं, तस्य परस्य अर्धस्य अर्धं बालत्व-वृद्धत्वयोः (गतम्), तेषाम् व्याधि-वियोग-दुःख-सहितम् अपरं सेवादिभिः नीयते । वारि-तरङ्ग-चञ्चल-तरे जीवे प्राणिनां कुतः सौख्यम्?*
Longevity of men is limited to one hundred years; half of it is lost during nights; half of the remaining half is lost in childhood and old age; the remaining period full of diseases and grief of separation is spent in service. Where is happiness for human beings in this life which is as impermanent as water waves?

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुः
नरः संसारान्ते विशति यमधानीयवनिकाम् ॥ वै-५० ॥
*अ: नरः नटः इव क्षणं बालः भूत्वा, क्षणम् अपि काम-रसिकः युवा (भूत्वा), क्षणं वित्तैः हीनः, क्षणम् अपि सम्पूर्ण-विभवः (भूत्वा), संसार-अन्ते जरा-जीर्णैः अङ्गैः वली-मण्डित-तनुः यम-धानी-यवनिकां विशति ।*
A man, like an actor, becomes a boy for some time, becomes a young man relishing sexual pleasures, becomes penny less for some time and a wealthy person for some time and finally at the end with a body debilitated by old age and having wrinkles all over goes behind the screen called the city of Yama.

## यतिनृपतिसंवादवर्णनम्

(Conversation between an ascetic and a king)
त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ॥ वै-५१ ॥
*अ: त्वं राजा, वयम् अपि उपासित-गुरु-प्रज्ञा-अभिमान-उन्नताः, विभवैः त्वं ख्यातः, नः यशां सि कवयः दिक्षु प्रतन्वन्ति। इत्थम् आवयोः उभयोः मान-धन-अतिदूरम् अन्तरम्, यदि अस्मासु पराङ्मुखः असि, वयम् अपि एकान्ततः निःस्पृहाः ।*
You are a king, while we are respected having been learned and devoted to our preceptor, you are famous for your wealth while our fame is spread all over by poets. Thus there is a lot of disparity between us in matters of respect and wealth. If you choose to ignore us, we are totally indifferent.

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं
शूरस्त्वं वादिदर्पव्युपशमनविधावक्षयं पाटवं नः ।
सेवन्ते त्वं धनाढ्या मतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्ननास्था ॥ वै-५२ ॥
*अ: राजन्! त्वम् अर्थानाम् ईशिषे, वयम् अपि च गिराम् अर्थं यावत् ईश्महे, त्वं शूरः, नः आदि-दर्प-व्युपशमन-विधौ अक्षयं पाटवम् । त्वं धन-आढ्या सेवन्ते, श्रोतुकामा मति-मलहतये माम् अपि (सेवन्ते), ते मयि अपि आस्था न चेत् त्वयि मम नितराम् एव अनास्था ।*
O king! You rule over wealth, we rule over the domain of meaningful words; you are brave, we are skilled in administering antidote to the basic quality of arrogance; Wealthy persons serve you, persons keen to listen to me for destroying the impurity of mind come to me; if you are indifferent to me I am equally indifferent to you.

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इव परितोषो निर्विशेषो विशेषः ।
स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥ वै-५३ ॥
अ: *वयम् इह वल्कलैः परितुष्टाः त्वं दुकूलैः, परितोषः समः इव, विशेषः निर्विशेषः । यस्य तृष्णा विशाला सः तु दरिद्रः भवतु, मनसि च परितुष्टे (सति) कः अर्थवान् कः दरिद्रः?*
We are here happy with bark garments, you are happy with silken garments, happiness is same, nothing is special. Let the person whose greed is broad be poor; if one is mentally happy who is rich or poor?

फलमलमशनाय स्वादुपानाय तोयं
क्षितिरपि शयनार्थं वाससे वल्कलं च ।
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणाम्
अविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ वै-५४ ॥
अ: *अशनाय फलम् अलम्, स्वादु-पानाय तोयं, शयनार्थं क्षितिः अपि, वाससे वल्कलं च ।*
*नव-धन-मधु-पान-भ्रान्त-सर्व-इन्द्रियाणां दुर्जनानाम् अविनयम् अनुमन्तुं न उत्सहे ।*
Fruit is enough for food, water is enough as a delicious drink, ground is good enough to sleep on, bark- garments serve for clothing. I have no enthusiasm to suffer improper conduct of wicked persons whose senses drunk with new wealth are disoriented.

अशीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्टे कुर्वीमहि किमीश्वरैः ॥ वै-५५ ॥
अ: *वयम् भिक्षाम् अशीमहि, आशा-वासः वसीमहि, मही-पृष्टे शयीमहि, ईश्वरैः किं कुर्वीमहि?*
We eat by begging, the directions are our clothing, we sleep on ground, what have we to do with the wealthy?

न नटा न विटा न गायका
न च सभ्येतरवादचुञ्चवः ।
नृपमीक्षितुमत्र के बयं
स्तनभारानमिता न योषितः ॥ वै-५६ ॥
अ: *वयं न नटा, न विटा, न गायकाः, न सभ्य-इतर-वाद-चञ्चवः, न स्तन-भार-आनमिता योषितः, नृपम् ईक्षितुं के?*
We are not actors, we are not sensualists, we are not skilled in talking indecently, we are not women bent with heavy breasts, who are we to wait upon the king?

विपुलहृदयैरीशैरेतज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ वै-५७ ॥
अ: *एतत् जगत् पुरा विपुल-हृदयैः ईशैः जनितम्, अपरैः विधृतम्, अन्यैः विजित्य तृणं यथा दत्तम्, इह हि अन्ये धीराः चतुर्दश भुवनानि भुञ्जते, पुंसां कतिपय-पुर-स्वाम्ये एषः मद-ज्वरः कः?*
This world was created long back by lords of liberal mind, many others possessed it, several others conquered it and gave away like straw; even here brave people enjoy fourteen worlds. What is this fever of arrogance for persons in owning a few towns?

अभुक्तायां यस्यां क्षणमपि न जातं नृपशतैः
भुवः तस्या लाभे क इव बहुमानः क्षितिभृताम् ।
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
विवादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ वै-५८ ॥

*अ: यस्याम् अभुक्तायां नृप-शतैः क्षणम् अपि न जातम्, तस्याः भुवः लाभे क्षितिभृतां कः इव बहुमानः? तत्-अंशस्य अंशे अपि तत्-अवयव-लेशे अपि जडाः पतयः विवादे कर्तव्ये प्रत्युत मुदं विदधति ।*

Whereas hundreds of kings have enjoyed this earth without respite, where is the need for kings to feel esteemed in acquiring it? Stupid land lords who should really feel disturbed when acquiring a miniscule part of that earth feel happy!

मृत्पिण्डो जलरेखया वलयितः सर्वोऽप्ययं नन्वणुः
स्वांशीकृत्य तमेव सङ्गरशतै राज्ञां गणा भुञ्जते ।
ते दद्युर्ददतोऽथवा किमपरं क्षुद्रा दरिद्रा भृशं
धिक्धिक्तान् पुरुषाधमान् धनकणान् वाञ्छन्ति तेभ्योऽपि ये ॥ वै-५९ ॥

*अ: अयं सर्वः अपि जल-रेखया वलयितः मृत्-पिण्डः ननु, राज्ञां गणाः तम् एव सङ्गर-शतैः स्व-अंशीकृत्य भुञ्जते, ते ददतः अथवा दद्युः वा, क्षुद्राः दरिद्राः भृशम्, अपरम् किम्? तेभ्यः अपि ये धन-कणान् वाञ्छन्ति तान् पुरुष-अधमान् धिक् धिक् ।*

This whole earth is a mass of mud bordered by water; kings enjoy that by partitioning through hundreds of battles; they are giving it up or will give up. Are they not lowly and deprived? Fie be to those worst of persons who seek pennies from such persons.

स जातः कोप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
कपालं यस्योच्चैर्विनिहितमलङ्कारविधये ।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ वै-६० ॥

*अ: यस्य धवलं कपालं मदन-रिपुणा मूर्ध्नि उच्चैः अलङ्कार-विधये विनिहितम्, सः कः अपि आसीत्, पुंसाम् अधुना प्राण-त्राण-प्रवण-मतिभिः कैश्चित् नृभिः नमद्भिः अयम् अतुल-दर्प-ज्वर-भरः कः?*

He was indeed somebody whose white skull bone Shiva, enemy of cupid, placed on his head as a decoration. Now what is this excessive fever of incomparable haughtiness of people while some persons whose minds are inclined towards saving their lives prostrate to them?

## मनःसम्बोधननियमनम्

( Addressing mind for restraint)

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदयक्लेशकलितम् ।
प्रसन्ने त्वय्यन्तः स्वयमुदितचिन्तामणिगणो
विविक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते ॥ वै-६१ ॥

अ: परेषां चेतांसि प्रतिदिवसम् बहुधा आराध्य प्रसादं नेतुं हृदयक्लेशकलितं किं विशसि ? त्वयि अन्तः प्रसन्ने स्वयम् उदित-चिन्तामणि-गणः विविक्तः सङ्कल्पः ते किम् अभिलषितं न पुष्यति?
After serving daily to gain the favour of other's minds why do you get into the agony of heart? If you are calm within yourself, what is it that the thoughts that arise which act as the divine gem do not give you?

परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ।
अतीतमननुस्मरन्नपि च भाव्यसङ्कल्पयन्
अतर्कितसमागमाननुभवामि भोगानहम् ॥ वै-६२ ॥

अ: चित्त! किं मुधा परिभ्रमसि ? क्वचन स्वयं विश्राम्यतां, यत् यथा भवति तत् तथा भवति न अन्यथा ।अहम् अतीतम् अननुस्मरन् अपि च भावि असङ्कल्पयन् अतर्कित-समागमान् भोगान् अनुभवामि ।
Dear mind! Why do you wander in vain? Rest somewhere, what is going to happen will happen and not other-wise. I enjoy unexpected pleasures forgetting the past and not thinking of the future.

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय-
श्रेयोमार्गमशेषदुःखशमनव्यापारपक्षं क्षणात् ।
स्वात्मीभावमुपैहि सन्त्यज निजां कल्लोललोलां गतिं
मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ वै-६३ ॥

अ: चेतः! एतस्मात् आयासकात् इन्द्रिय-अर्थ-गहनात् विरम । अशेष-दुःख-शमन-व्यापार-पक्षं श्रेयोमार्गम् क्षणात् आश्रय । स्वात्मीभावम् उपैहि, निजां कल्लोललोलां गतिं सन्त्यज, भूयो भङ्गुरां भवरतिं मा भज, अधुना प्रसीद ।
O mind! Stop getting into the tiring abyss of sensual matter; quickly take shelter in the beneficial path which is capable of quelling all the sorrow; look inwardly within yourself ; leave the state of mobility which is as changing as a wave, do not again get into the fragile desire of worldly affairs. Be tranquil.

मोहं मार्जय तामुपार्जय रतिं चन्द्रार्धचूडामणौ
चेतः स्वर्गतरङ्गिणीवनभुवानासङ्गमङ्गीकुरु ।
को वा वीचिषु बुद्बुधेषु च तडिल्लेखासु च श्रीषु च
ज्वालाग्रेषु च पन्नगेषु च सुहृद्वर्गेषु च प्रत्ययः ॥ वै-६४ ॥

*अ: चेतः! मोहं मार्जय, चन्द्रार्ध-चूडामणौ तां रतिम् उपार्जय, स्वर्ग-तरङ्गिणी-वन-भुवाम् आसङ्गम् अङ्गीकुरु, वीचिषु बुद्बुधेषु च तडित् लेखासु च श्रीषु च*
*ज्वाल-अग्रेषु च पन्नगेषु च सुहृद्-वर्गेषु च को वा प्रत्ययः?*

O Mind! Sweep away delusion; earn love for Siva who has as his crescent gem the half moon; accept attachment to the banks of river Ganga. What type of trust can you have in waves, bubbles, lightning, wealth, flame of a fire, snakes and friends?

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया
भूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम् ।
कन्थाकञ्चुकिनः प्रविश्य भवनद्वाराणि वाराणसी-
रथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥ वै-६५ ॥
*अ: चेतः! इमाम् अस्थायिनीं रमां सकृत् मा चिन्तय,*
*भूपाल-भ्रुकुटी-कुटी-विहरण-व्यापार-पण्याङ्गनाम् (च मा चिन्तय), कन्था-कञ्चुकिनः वाराणसी-रथ्या-पङ्क्तिषु भवनद्वाराणि प्रविश्य पाणि-पात्र-पतितां भिक्षाम् अपेक्षामहे ।*
O Mind! Never think of unstable Goddess of wealth, never think of the prostitute whose only business is to dwell on the eye-brows of kings; we shall seek alms which fall into the vessel held in our hands as we enter the doors of houses wearing rags in the streets of Varanasi.

अग्रे गीतं सरसकवयो पार्श्वयोर्दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वम्
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ वै-६६ ॥
*अ: चेतः! अग्रे गीतं, पार्श्वयोः दाक्षिणात्याः सरसकवयः, पश्चात् चामरग्राहिणीनाम् लीलावलयरणितं यदि एवम् अस्ति भव-रस-आस्वादने लम्पटत्वम् कुरु*
*नो चेत् निर्विकल्पे समाधौ सहसा प्रविश ।*
O Mind! There should be music in front, on the sides skilled poets from the South, behind there should be the jingling of the bangles of ladies holding fans; if these thing are there enjoy yourself in worldly pleasures, if not enter the state of absolute meditation.
प्राप्ताः श्रियः सकलकामदुघास्ततः किम्
न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।
सम्पादिताः प्रणयिनो विभवैस्ततः किम्
कल्पस्थितास्तनुभृतां तनवस्ततः किम् ॥ वै-६७ ॥
*अ: सकल-काम-दुघाः श्रियः प्राप्ताः, ततः किम्? विद्विषतां शिरसि पदं न्यस्तं, ततः किम्? विभवैः प्रणयिनः सम्पादिताः, ततः किम्? तनुभृतां तनवः कल्प-स्थिताः, ततः किम्?*
Wealth which provides for every type of desires has been obtained, so what? Foot has been placed on the heads of adversaries, so what? Lovers have been acquired by my wealth, so what? Bodies of persons are going remain for aeons, so what?

भक्तिर्भवे मरणजन्मभयं हृदिस्थं
स्नेहो न बन्धुषु न मन्मथजा विकाराः ।

संसर्गदोषरहिता विजना वनान्ता
वैराग्यमस्ति किमतःपरमर्थनीयम् ॥ वै-६८ ॥
*अ: भवे भक्तिः, मरण-जन्म-भयं हृदिस्थं, बन्धुषु न स्नेहः, मन्मथ-जाः विकाराः न,संसर्ग-दोष-रहिताः विजनाः वनान्ताः, वैराग्यम् अस्ति (चेत्) अतः परं अर्थनीयं किम्?*
Devotion to Lord Siva, fear of death and birth in the heart, not being attached to kith and kin, not having feelings caused by Cupid, inclination to living in lonely forest lands and detachment; if these are there, where is the need for anything else?

तस्मादनन्तमजरं परमं विकासि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥ वै-६९ ॥
*अ: तस्मात् अनन्तम् अजरं परमं विकासि तत् ब्रह्म चिन्तय यस्य इमे अनुषङ्गिणः भुवन-आधिपत्य-भोग-आदयः कृपण-लोक-मताः भवन्ति, एभिः असत्-विकल्पैः किं (कार्यम्)?*
Therefore meditate on that Brahman, which is endless, ever expanding, and never ageing for which these lordship over earth, pleasures etc. become worthless consequences. For what purpose are these unreal alternatives?

पातालमाविशसि यासि नभो विलङ्घ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ।
भ्रान्त्यापि जातु विमलं कथमात्मलीनं
न ब्रह्म संस्मरसि निर्वृतिमेषि येन ॥ वै-७० ॥
*अ: मानस! चापलेन भ्रान्त्या पातालम् आविशसि, नभः विलङ्घ्य यासि, दिङ्मण्डलं भ्रमसि, आत्म-लीनं ब्रह्म येन निर्वृतिम् एषि कथं न संस्मरसि?*
O mind! Due to an unsteady delusion, you enter the nether world, jump up the sky and wander around the earth; how is it that you do not remember the Brahman which is merged with the self with the help of which you get beatitude?

## नित्यानित्यवस्तुविचारः

(Discussion on permanent and impermanent things)

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।
मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं शेषैर्वणिग्वृत्तिभिः ॥ वै-७१ ॥

*अ: वेदैः स्मृतिभिः पुराण-पठनैः महा-विस्तरैः शास्त्रैः स्वर्ग-ग्राम-कुटी-निवास-फलदैः कर्म-क्रिया-विभ्रमैः किम्? भव-दुःख-भार-रचना-विध्वंस-काल-अनलं स्व-आत्म-आनन्द-पद-प्रवेश-कलनं एकं मुक्त्वा शेषैः वणिक्-वृत्तिभिः (किम्)?*
What is the use of Vedas, Codes of conduct, elaborate scriptures and restless actions and rituals whose fruits are heaven, rural residence etc.? What is the use of commercial activities other than the one which acts as a conflagration at the end of Time destroying the burden of the grief of worldly affairs and which enables ones entry into the abode of inner joy.

यतो मेरुः श्रीमान्निपतति युगान्ताग्निवलितः
समुद्राः शुष्यन्ति प्रचुरमकरग्राहनिलयाः ।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ वै-७२ ॥
*अ: यतः श्रीमान् मेरुः युग-अन्त-अग्नि-वलितः निपतति, प्रचुर-मकर-ग्राह-निलयाः समुद्राः शुष्यन्ति, धरणि-धर-पादैः अपि धृता धरा अन्तं गच्छति, करि-कलभ-कर्ण-अग्र-चपले शरीरे का वार्ता?*
Where is the question of (the permanency) of this body which is as unsteady as the ear-tips of an elephant, when even the richly endowed mountain Meru falls engulfed by the annihilating Fire, oceans which house sharks and crocodiles dry up and the earth held firm by the mountains collapses?

गात्रं सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिः
दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ।
वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥ वै-७३ ॥
*अ: जीर्णवयसः पुरुषस्य गात्रं सङ्कुचितं (भवति), गतिः विगलिता, दन्त-आवलिः भ्रष्टा, दृष्टिः नश्यति, बधिरता वर्धते, वक्त्रं च लालायते, बान्धवजनः वाक्यं नाद्रियते, भार्या न शुश्रूषते, पुत्रः अपि अमित्रायते, हा कष्टम् ।*
An old man’s body shrinks, his steps become loose, his teeth are lost, eye sight weakens, deafness increases, saliva oozes out from the mouth, relatives do not respect him, wife does not serve, even son becomes unfriendly, what a pity!

वर्णं सितं झटिति वीक्ष्य शिरोरुहाणां
स्थानं जरापरिभवस्य तदा पुमांसम् ।
आरोपितास्थिशतकं परिहृत्य यान्ति
चण्डालकूपमिब दूरतरं तरुण्यः ॥ वै-७४ ॥
*अ: तरुण्यः शिरोरुहाणां सितं वर्णं वीक्ष्य तदा जरा-परिभवस्य स्थानं पुमांसं झटिति आरोपित-अस्थि-शतकं चण्डाल-कूपम् इव परिहृत्य दूरतरं यान्ति ।*

Young women keep away in haste from old men, looking at their white hairs and how old age has defeated those men, just as people keep away from wells filled with hundreds of bones and used by the low caste people.

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ वै-७५ ॥
*अ: यावत् इदं शरीरम् अरुजं स्वस्थं यावत् जरा दूरतः, यावत् इन्द्रिय-शक्तिः अप्रतिहता, यावत् आयुषः क्षयः न तावत् एव विदुषा आत्म-श्रेयसि महान् प्रयत्नः कार्यः। भवने सन्दीप्ते कूप-खननं प्रति उद्यमः कीदृशः?*
While this body is in good health without any illness, while the senses have not lost their sharpness and while longevity is not reduced, much effort has to be put in by a wise man for the good of his soul. What sort of an action is it to start digging a well when the house is on fire?

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविनयम् ।
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान्
न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ वै-७६ ॥
*अ: जने कतिपय-निमेष-आयुषि, तपस्यन्तः सन्तः सुरनदीं अधि निवसामः किम्? उत गुण-उदारान् दारान् सविनयम् परिचरामः , उत विविध-काव्य-अमृत-रसान् शास्त्र-ओघान् पिबामः, न विद्मः किं कुर्मः ।*
Shall we live near the river Ganga doing penances? Or, shall we serve in humility virtuous wives? Or, shall we drink the streams of ambrosia-like various literary works which act as streams of scripture? We do not know what we should do.

दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजः
वयं च स्थूलेच्छाः सुमहति फले बद्धमनसः ।
जरा देहं मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥ वै-७७ ॥
*अ:सखे! अमी तुरग-चल-चित्ताः क्षितिभुजः दुराराध्याः, वयं च स्थूल-इच्छाः सुमहति फले बद्ध-मनसः,जरा देहं हरति, मृत्युः दयितम् इदं जीवितं हरति, अन्यत्र जगति तपसः अन्यत् श्रेयः न ।*
Dear friend, these kings who are fickle-minded like horses are difficult to serve; but we with a large desire are determined to attain the great goal; old age takes away this dear body, death takes away this life; elsewhere in this world there is nothing beneficial other than penance.

माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-
पूतग्रावगिरीन्द्रकन्दरनटीकुञ्जे निवासः क्वचित् ॥ वै-७८ ॥
*अ: माने म्लायिनि, वसुनि खण्डिते च, अर्थिनि व्यर्थे प्रयाते, बन्धुजने क्षीणे, परिजने गते, शनैः यौवने नष्टे, सुधियां केवलम् एतत् एव, यत् क्वचित् जह्नु-कन्या-पयः-पूत-ग्राव-गिरीन्द्र-कन्दर-नटी-कुञ्जे निवासः युक्तम् ।*
With respect for oneself fading away, wealth gone to pieces, those seeking help having gone away, relatives having thinned out, members of family having gone, youth getting lost slowly, the only thing a wise man could do is to settle down in a bower in a cave of a big mountain with rocks purified by the waters of river Ganga.

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसमागमागतसुखं काव्येषु रम्याः कथाः ।
कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमनित्यतामुपगते चित्ते न किञ्चित्पुनः ॥ वै-७९ ॥
अ: *चन्द्रमरीचयः रम्याः तृणवती वन-अन्त-स्थली रम्या साधु-समागम-आगत-सुखं रम्यं काव्येषु कथाः रम्याःकोप-उपाहित-बाष्प-बिन्दु-तरलं प्रियाया मुखं रम्यं सर्वं रम्यम् चित्ते अनित्यताम् उपगते न किञ्चित्पुनः (रम्यम्)* ।
Pleasant are the moonbeams, pleasant are the grass laden forest interiors; pleasant is the happy meeting with saints; pleasant are the stories in literary works; pleasant is the face of the beloved with unsteady drops of tears brought out by feigned anger; everything is pleasant; but if there is restlessness in mind nothing is pleasant.

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।
किन्तु भ्रान्तपतङ्गपक्षपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥वै-८० ॥
अ: *वसतये हर्म्यतलं रम्यं न किं? गेयादिकं श्रव्यं न (किम्), वा प्राण-समा-समागम-सुखं एव अधिकप्रीतये न किं ? किन्तु सकलं भ्रान्त-पतङ्ग-पक्ष-पवन-व्यालोल-दीप-अङ्कुर-च्छाया-चञ्चलम् आकलय्य सन्तः वनान्तं गताः ।*
Is not a mansion nice for staying? Is it not nice to listen to music? Or is it not very pleasing to meet with a beloved? But considering that everything is as temporary as the unsteady shadow of the flame of a lamp wavering due to the air blown by the wings of a disoriented moth, the wise have gone to the forest.

## शिवार्चनम्

( Worshipping Shiva)

आसंसारात्त्रिभुवनमिदं चिन्वतां तात तादृक्-
मैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा ।
योऽयं धत्ते विषयकरिणीगाढगूढाभिमान-
क्षीबस्यान्तःकरणकरिणः संयमानायलीलाम् ॥ वै-८१ ॥
अ: *तात! आसंसारात् त्रिभुवनम् इदं चिन्वतां अस्माकं नयनपदवीं श्रोत्रमार्गं वा तादृक्-*
*एव मा गतो, यः अयं विषय-करिणी-गाढ-गूढ-अभिमान-*
*क्षीबस्य अन्तःकरण-करिणः संयम-आनाय-लीलाम् धत्ते ।*
Dear! We, who have been searching this world ever since its beginning have not heard or seen one who acts as the rope-net which controls the elephant called mind which is intoxicated with the deep secret desire for the female elephant called the sensual pleasures.

यदेतत् स्वच्छन्दं विहरणमकार्पण्यमशनं
सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ।
मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन्
न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ वै-८२ ॥
*अ: एतत् स्व-छन्दं विहरणम्, अ-कार्पण्यम् अशनम्, आर्यैः सह संवासः, उपशम-एक-व्रत-फलं श्रुतं, मनः बहिः अपि मन्द-स्पन्दं, चिरस्य विमृशन् अपि कस्य उदारस्य तपसः एषा परिणतिः न जाने ।*
I do not know what type of penance results in this type of maturity: care-free wandering, food without the need to feel humble, living among the virtuous, sacred knowledge with the sole purpose of mental tranquillity, internally and externally very little wavering.

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं
हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ।
किं युक्तं सहसाभ्युपैति बलवान्कालः कृतान्तोऽक्षमी
हा ज्ञातं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्या गतिः ॥ वै-८३ ॥
*अ: मनोरथाः च हृदये एव जीर्णाः, तत् यौवनं च यातं, गुणाः च गुणज्ञैः विना अङ्गेषु*
*वन्ध्य-फलतां याताः, हन्त । किं युक्तम्? । अक्षमी बलवान् कालः कृतान्तः सहसा अभ्युपैति ।*
*हा, ज्ञातम्, मदन-अन्तक-अङ्घ्रि-युगलं मुक्त्वा अन्या गतिः न अस्ति ।*
Our yearnings have aged and weakened in the heart only, that youth is gone, due to lack of discerning people good qualities have been in vain, alas, the unforgiving powerful God of death quickly approaches. Yes, I know, there is no other go than seeking the feet of Shiva who annihilated the Love God.

महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेदप्रतिपत्तिरस्ति मे

तथापि भक्तिस्तरुणेन्दुशेखरे ॥ वै-८४ ॥
*अ: जगताम् अधीश्वरे महेश्वरे वा जगत्-अनतर्-आत्मनि जनार्दने वा मे वस्तु-भेद-प्रतिपत्तिः न अस्ति, तथा अपि भक्तिः तरुण-इन्दु-शेखरे (अस्ति) ।*
I do not recognize any difference between Mahesvara who is the over lord of all the worlds and Vishnu who is the inner soul of the worlds. Even then my devotion is to Shiva with the young moon on his crest.

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।
भवाभोगोद्विग्नाः शिव शिव शिवेत्युच्चवचसः
कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदशाम् ॥ वै-८५ ॥
*अ: शान्त-ध्वनिषु रजनीषु द्यु-सरितः क्व अपि स्फुरत्-स्फार-ज्योत्स्ना-धवलित-तले पुलिने सुख-आसीनाः भव-आभोग-उद्विग्नाः शिव शिव इति उच्च-वचसः अन्तर्गत-बहुल-बाष्प-आकुल-दशां कदा यास्यामः?*
When shall we, agitated by the serpent of worldly affairs, reach the state where copious tears of joy are internally controlled  chanting loudly “ shiva, shiva, shiva”, on nights when all sound has subsided, reclining comfortably somewhere on the sparkling extensive moon-light-lit sands of the divine river Ganga ?

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः
स्मरन्तः संसारे विगुणपरिणामां विधिगतिम् ।
वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणाः
त्रियामा नेष्यामो हरचरणचिन्तैकशरणाः ॥ वै-८६ ॥
*अ: वयं सर्वस्वे संसारे वितीर्णे तरुण-करुणा-पूर्ण-हृदयाः विगुण-परिणामां विधि-गतिं स्मरन्तः पुण्य-अरण्ये परिणत-शरत्-चन्द्र-किरणाः त्रियामाः हर-चरण-चिन्ता-एक-शरणाः नेष्यामः ।*
After crossing all the worldly affairs remembering the ill effects of the vicissitudes of destiny and with our hearts full of fresh compassion, when shall we spend nights in a holy forest lit by the rays of the autumnal full moon taking sole refuge in the thoughts of the feet of Shiva?

कदा वाराणस्याममरतटिनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ वै-८७ ॥
*अ: वाराणस्याम् अमर-तटिनी-रोधसि वसन् कौपीनं वसानः शिरसि अञ्जलि-पुटं निदधानः “अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन” इति आक्रोशन् दिवसान् निमिषम् इव नेष्यामि?*
When shall I spend my days as if they are minutes in the city of Varanasi living on the banks of Ganga wearing a loin-cloth with hands folded above my head chanting, “ O Consort of Gauri, the destroyer of Tripura, Shambhu, the three-eyed”?

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ वै-८८ ॥
*अ: विभो! स्मर-अरे! गाङ्गैः पयोभिः स्नात्वा, त्वां शुचि-कुसुम-फलैः अर्चयित्वा,*
*क्षितिधर-कुहर-ग्राव-पर्यङ्क-मूले ध्येये ध्यानं निवेश्य, त्वत्-प्रसादात् आत्मा-आरामः फल-आशी*
*गुरु-वचन-रतः स-मकर-चरणे पुंसि सेवा-समुत्थं दुःखं कदा अहं मोक्ष्ये?*
Lord! Enemy of Cupid! When will I by, your grace, after bathing in Ganga, worshipping you with fresh flowers and fruits, meditating on Brahman, who needs to be meditated upon, on a stone seat in the cave of a mountain, feeling mental tranquillity eating only fruits listening to the words of the preceptor, shed my grief arising from my service to a king with Makara marks on his feet ?

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।
कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ वै-८९ ॥
*अ: शम्भो! एकाकी निःस्पृहः शान्तः पाणि-पात्रः दिगम्बरः कर्म-निर्मूलन-क्षमः कदा भविष्यामि?*
When will I become capable of uprooting my Karma by staying in solitude, without any desire, calm, with my hands being my begging bowl and shedding my clothes?

पाणिं पात्रयतां निसर्गशुचिना भिक्ष्येण सन्तुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ।
अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशा-
मध्वा कोऽपि शिवप्रसादसुलभः सम्पत्स्यते योगिनाम् ॥ वै-९० ॥
*अ: पाणिं पात्रयतां, निसर्ग-शुचिना भिक्ष्येण सन्तुष्यतां, यत्र क्व अपि निषीदतां, तनोः अ-त्यागे अपि अखण्ड-परमानन्द-अवबोध-स्पृशां, विश्वं मुहुः बहु-तृणं पश्यतां योगिनां कः अपि शिव-प्रसाद-सुलभः अध्वा सम्पत्स्यते ।*
Contemplative ascetics acquire, due to grace of Shiva, an indescribable easily negotiable way of living by using their hands only as a bowl, feeling satiated by the naturally clean alms, staying anywhere, feeling the realization of continuous ultimate bliss and considering all this world as worthless as straw.

## अवधूतचर्या

(Conduct of those who have renounced the world)
कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी
नैश्चिन्त्यं निरपेक्षभैक्षमशनं निद्रा श्मशाने वने ।
स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा

स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किम्॥ वै-९१ ॥
*अ: शत-खण्ड-जर्जरतरं कौपीनं, कन्था पुनः तादृशी, नैश्चिन्त्यम्, अशनं निरपेक्ष-भैक्षम्, निद्रा श्मशाने (वा) वने, निरङ्कुशं स्वातन्त्र्येण विहरणं स्वान्तं सदा प्रशान्तम्, योग-महा-उत्सवे अपि स्थैर्यं यदि, त्रैलोक्य-राज्येन किम्?*
A worn out loin cloth of many pieces, a similar lower garment, state of having no worries, unasked for alms as food, sleeping in a forest or a cemetery, roaming around freely without any restraint, mental peace, stability in deep meditation, if these are there of what use is the suzerainty over the three worlds?

ब्रह्माण्डं मण्डलीमात्रं किं लोभाय मनस्विनः ।
शफरीस्फुरितेनाब्धिः क्षुब्धो न खलु जायते ॥ वै-९२ ॥
*अ: मण्डली-मात्रं ब्रह्माण्डं मनस्विनः लोभाय किम्? अब्धिः शफरी-स्फुरितेन क्षुब्धः न जायते खलु?*
Can the whole universe which is just a province tempt one who has conquered his mind? Does the ocean get disturbed by the rolling of a Shaphari fish?

मातर्लक्ष्मि भजस्व कञ्चिदपरं मत्काङ्क्षिणी मा स्म भूः
भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि ।
सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृतैः
भिक्षावस्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥ वै-९३ ॥
*अ: मातः लक्ष्मि! मत्-काङ्क्षिणी मा स्म भूः, भोगेषु स्प्रहयालवः तव वशे (भवन्ति), निःस्पृहाणाम् का असि? सम्प्रति वयं सद्यः-स्यूत-पलाशपत्र-पुटिका-पात्रे पवित्रीकृतैः भिक्षा-वस्तुभिः एव वृत्तिं समीहामहे ।*
Mother Lakshmi! Do not aspire for me. There are others under your control who are fond of sensual pleasures. You are nobody for those who have no desires. Now we wish to live on things received as alms sanctified in the just-sewn cups made of Palasha leaves.

महाशय्या पृथ्वी विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।
शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितः
सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ वै-९४ ॥
*अ: पृथ्वी महा-शय्या, भुज-लता विपुलम् उपधानं, आकाशं वितानं च, अयम् अनुकूलः अनिलः व्यजनम्, शरत्-चन्द्रः दीपः, विरति-वनिता-असङ्ग-मुदितः मुनिः अ-तनु-भूतिः नृपः इव सुखी शान्तः शेते ।*
The earth is the large bed; creeper-like shoulders are the broad pillows; sky is the canopy; this pleasant wind is the fan; the autumnal moon is the lamp; happy with abstention and lack of contact with women the sage sleeps happily like a king of ample means.

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा
हानादानविरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः ।
रथ्याकीर्णविशीर्णवसनः सम्प्राप्तकन्थासनो
निर्मानो निरहङ्कृतिः शमसुखाभोगैकबद्धस्पृहः ॥ वै-९५ ॥
*अ: भिक्षा-आशी जन-मध्य-सङ्ग-रहितः स्व-आयत्त-चेष्टः हान-आदान-विरक्त-मार्ग-निरतः रथ्या-कीर्ण-विशीर्ण-वसनः सम्प्राप्त-कन्था-आसनः निर्मानः निरहङ्कृतिः शम-सुख-आभोग-एक-बद्ध-स्पृहः कश्चित् तपस्वी स्थितः ।*
There stays some ascetic eating on alms, bereft of interaction with people, having activities totally under his control, busy treading the sage's path of rejection (of the wrong) and acceptance (of the good), having for his clothing torn clothes thrown on the streets (by others), having a seat of rags, devoid of pride and self-esteem, and solely longing for the joy of tranquillity.

चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः
किं वा तत्त्वविवेकपेशलमतिर्योगीश्वरः कोऽपि किम् ।
इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनै-
र्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ वै-९६ ॥
*अ: अयं तापसः किं चण्डालः, अथवा द्विजातिः, अथ शूद्रः किं, वा कः अपि तत्त्व-विवेक-पेशल-मतिः योगीश्वरः किम्, इति उत्पन्न-विकल्प-जल्प-मुखरैः जनैः आभाष्यमाणाः स्वयं न क्रुद्धाः, न एव तुष्ट-मनसः योगिनः पथि यान्ति ।*
There go ascetics, neither angry nor happy on their own, while people talk about them endlessly in different ways, "Is he an out- caste or a Brahmin or a Shudra or a great ascetic whose mind is soft due to realization of the ultimate truth?"

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं
व्यालानां पशवस्तृणाङ्कुरभुजस्तुष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
तामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ वै-९७ ॥
अ: हिंसा-शून्यम् अ-यत्न-लभ्यम् अशनं धात्रा व्यालानां मरुत्कल्पितम् अशनं, तृण-अङ्कुर-भुजः पशवः तुष्टाः स्थलीशायिनः । संसार-अर्णव-लङ्घन-क्षम-धियां नृणां सा वृत्तिः कृता । ताम् अन्वेषयतां सर्वे गुणाः सततं समाप्तिं प्रयान्ति ।
Violence-less food obtained without effort, food for serpents created by the creator as air, cattle are happy lying on the ground nibbling the sprouts of grass. That type of life is made for those capable of crossing the ocean of worldly life. All qualities culminate in such a life who seek it.

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः

कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्गे मदीये ॥ वै-९८ ॥
*अ: गङ्गा-तीरे हिमगिरि-शिला-बद्ध-पद्मासनस्य*
*ब्रह्म-ध्यान-अभ्यसन-विधिना योगनिद्रां गतस्य मम तैः सुदिवसैः यत्र ते जरठ-हरिणाः स्वाङ्गम् मदीये अङ्गे निर्विशङ्काःकण्डूयन्ते किं भाव्यम् ?*
What is there to be accomplished in those good days when I am seated in the lotus posture on a rock of the Himalayas having reached sleep-lke deep meditation through the practice of meditating on Brahman when old deer rub their bodies against mine fear-lessly.

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं
विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वी ।
येषां निःसङ्गताङ्गीखरणपरिणतस्वान्तसन्तोषिणस्ते
धन्याः सन्न्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ वै-९९ ॥
*अ: येषां पाणिः पवित्रं पात्रं, भ्रमण-परिगतं भैक्ष्यम् अक्षय्यम् अन्नं, विस्तीर्णं वस्त्रम् आशादशकम् उर्वी अचपलं अस्वल्पम् तल्पम् , निःसङ्गता-अङ्गीकरण-परिणत-स्वान्त-सन्तोषिणः सन्न्यस्त-दैन्य-व्यतिकर-निकराः ते धन्याः कर्म निर्मूलयन्ति ।*
Those blessed people whose hand is the holy vessel, whose food is obtained through wandering as alms, whose clothing is the vast ten directions, who are inwardly happy after having accepted the tenet of being detached, having left off hindrances such as covetousness uproot their Karmas.

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल-
भ्रातर्व्योम निबद्ध एव भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतस्फारत्स्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ वै-१०० ॥
*अ: मातः मेदिनि ! तात मारुत ! सखे तेजः! सुबन्धो जल ! भ्रातः व्योम! भवताम् अन्त्यः प्रणाम-अञ्जलिः निबद्ध एव ।युष्मत्-सङ्ग-वश-उपजात-सुकृत-स्फारत्-स्फुरत्-निर्मल-ज्ञान-अपास्त-समस्त-मोह-महिमा (अहं) परब्रह्मणि लीये ।*
Dear mother Earth!, dear father Wind!, Dear friend Fire!, Dear relative Water! Dear brother Sky!, I submit my ultimate prostrations. I dissolve in the Brahman after having got rid of all the effects of delusions by acquiring the clear sparkling Knowledge due to the good deeds done as a result of my association with you.

॥ इति सुभाषितत्रिशत्यां वैराग्यशतकं सम्पूर्णम् ॥
End of Vairagyashatakam

॥ इति भर्तृहरिकृतसुभाषितत्रिशती सम्पूर्णा ॥